

सङ्क्रमणम्

चमू कृष्ण शास्त्री

संस्कृतभारती

देहली - बेङ्लूरु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सङ्क्रमणम्

चमू कृष्ण शास्त्री

संस्कृतभारती
देहली - बेङ्गलूरु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतभारती
'अक्षरम्', ८ उपमार्गः, २ घट्टः
गिरिनगरम्, बेङ्गलूरु - ८५

© प्रकाशकस्य एव ।

प्रथममुद्रणम् - १९९८ - ५०००
द्वितीयमुद्रणम् - १९९९ - १०,०००

मूल्यम् - रू. १५/-

मुद्रणम् -
ग्राफिक वर्ल्ड
१६८६, कुचा दखनि राय
दरिया गंज, नई दिल्ली - ६

प्राप्तिस्थानम् - संस्कृतभारती
मातामन्दिर गली, झण्डेवाला
नई दिल्ली - ११० ०५५

SANKRAMANAM - A collection of inspiring articles of Chamu Krishna Shastry. Publisher - SAMSKRITA BHARATI, 'Aksharam', 8th Cross, II Phase, Girinagar, Bangalore - 560 085.

Pages: vi+74 Price: Rs. 15/- Second Print: December 1999

Printed at : Graphic World, 1686, Kucha Dakhani Rai,
Dariya Ganj, New Delhi - 6

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राक्कथनम्

वा॰रा॰ पञ्चमुखी
कुलाधिपतिः
राष्ट्रिय-संस्कृत-विद्यापीठम्
तिरुपति ।

श्री चमू कृष्णशास्त्रिमहाभागानां ''सङ्क्रमणं'' नाम पुस्तकं मया आमूलाग्रम् अवलोकितं, पुनः पुनः पठितम् अधीतं च । इतः पूर्वं 'सम्भाषणसन्देश' पत्रिकायां मुद्रितानि एतानि एव लेखनानि मया पठितानि आसन् । तथापि पुस्तकरूपेण प्रकाशितस्य अस्य लेखनसङ्ग्रहस्य पुनः पुनः पठने अभिरुचि मयि जागृता एव आसीत् । एषु लेखनेषु श्री कृष्णशास्त्रिभिः उद्बोधिताः विषयाः पुनः पुनः परिशीलनं, चिन्तनम् अध्ययनं च अर्हन्ति । श्री कृष्णशास्त्रिणां प्रतिपादनशैली अत्यन्तम् आकर्षिका उत्तेजनकारिणी च वर्तते इति निमित्तेन तेषां लेखनानां पुनः पुनः पठनं चित्तस्य आमोदकरमेव तिष्ठति ।

संस्कृतप्रपञ्चे अधुना सङ्क्रमणकालः प्रवर्तते इति श्री कृष्णशास्त्रिभिः नूनं सुष्ठु प्रतिपादितं भासते । संस्कृतप्रपञ्चस्य स्थितिः रात्रौ कमलपत्राणां मध्ये बद्धस्य द्विरेफस्य स्थितिः इव सञ्जाता इति एकः श्लोकः स्मृतिपथम् आयाति ।

रात्रिर्गमिष्यति भविष्यति सुप्रभातम् ।
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।।
इत्थं विचिन्तयति कोशगते द्विरेफे ।
हा हन्त ! हन्त ! नलिनीं गज उज्जहार ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतविषये आस्थायाः अभिवर्धनं, संस्कृतं नैव कठिनभाषा इति विश्वासोत्थापनं, सरलसंस्कृतभाषायाः उपयोगार्थं प्रेरणं, संस्कृतस्य संस्कृतमाध्यमेनैव शिक्षणं, संस्कृतवाङ्मयस्य आधुनिकविज्ञानप्रपञ्चे उपयुक्तेः प्रतिपादनं, संस्कृतसम्भाषणस्य प्रोत्साहनं, संस्कृतस्य सङ्गणकाभ्यासे उपयुक्तेः प्रचारः, संस्कृतविषये प्ररुढस्य मानसिकावरोधस्य निष्कासनं, संस्कृतानुरागिणां, संस्कृतसंघटनानां, संस्कृतसंस्थानां च अभिनिर्धारणं, परस्परसम्बन्धस्थापनं, संस्कृतप्रचारविषये नूतनान्दोलनस्य उपस्थापनम्, इत्यादयः अत्यन्तं समुचिताः विचाराः श्रीकृष्णशास्त्रिभिः परमप्रभावकारिरीत्या पुरतः कृताः प्रकाशन्ते । एते सर्वेऽपि विचाराः समेषां सूक्तोपक्रमाणां व्यवहारीकरणार्थं समग्रदेशे संस्कृतविषयक-प्रेमपरिसरस्य निर्माणम् अत्यन्तम् आवश्यकम् । दशसहस्राधिककार्यकर्तृणां कार्यकर्त्रीणां च आवश्यकता वर्तते । संस्कृतसम्भाषणशिबिराणाम् आयोजनस्य आवश्यकता वर्तते । संस्कृत-विज्ञानसम्बन्धस्य विषये चर्चासत्राणि देशस्य कोणेषु कोणेषु आयोजयितव्यानि । टी०वी०, रेडियो, वृत्तपत्राणि, पुस्तकप्रकाशनं, संस्कृतसम्बन्धिसंस्थानां परस्परं सङ्गणकसम्बन्धः इत्यादीनां भिन्नभिन्नोपक्रमाणाम् उपयोगः संस्कृतप्रचाराय अवश्यं कर्तव्यः । श्री कृष्णशास्त्रिणां प्रबन्धेषु अनेके उपक्रमाः बहुमार्मिकरीत्या प्रतिपादिताः समेषां गणनामर्हन्ति ।

अस्मिन् संस्कृतप्रचारान्दोलनसन्दर्भे संस्कृतविद्यापीठानां, संस्कृतशिक्षकाणां च उत्तरदायित्वं विशेषतया अधिकतरं वर्तते । सर्वकारस्यापि उत्तरदायित्वं महत् वर्तते । नूनं प्रमोदविषयः यत् अयं १९९९-२००० वर्षः संस्कृतवर्षरूपेण उद्घोषितः चकास्ति । परं देशे संस्कृतस्य सूक्तम् आदरणीयस्थानं पुनः परिकल्पयितुम् अनेकेषां वर्षाणां संस्कृतवर्षत्वेन उद्घोषणम् आवश्यकं भवेत् । संस्कृतानुरागिभिः सर्वैरपि
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
अस्मिन् संस्कृतप्रचारान्दोलनसत्रे सक्रियैः भूत्वा भागः ग्रहीतव्यः । अस्मिन्

अस्मिन् संस्कृतप्रचारान्दोलनसत्रे सक्रियैः भूत्वा भागः ग्रहीतव्यः । अस्मिन् सत्रे श्री कृष्णशास्त्रिणः अध्वर्युस्थानं गृहीतवन्तः विराजन्ते । तेषां नेतृत्वे मार्गदर्शने प्राचाल्यमाना 'संस्कृतभारती' संस्था अत्यन्तं प्रशंसार्हं कार्यं कुर्वती अस्माकं समेषाम् अभिनन्दनपात्रं चकास्ति । श्री चमू कृष्णशास्त्रिणः आत्मनः स्वीयविश्रान्ति- सुखचिन्तां परित्यज्यापि संस्कृतप्रचारान्दोलने बद्धकङ्कणाः अत्यन्तम् अभिनन्दनार्हाः । अधुना संस्कृतप्रसारकार्यं तेषां जीवनसर्वस्वमिव सञ्जातम्। यदि श्री चमू कृष्णशास्त्रिसदृशाः नेतारः संस्कृतप्रपञ्चे अधिकसंख्यया उपलभ्यन्ते तर्हि संस्कृतस्य भविष्यं नूनम् उज्ज्वलं वर्तते इति विषये न कोऽपि सन्देहः ।

अस्य 'सङ्क्रमण' ग्रन्थस्य न केवलं पठनं परं तु सम्यक्रीत्या अध्ययनम् अपि सर्वैरपि संस्कृताभिमानिभिः विहितव्यम् इति मे आग्रहपूर्वकं विज्ञापनम् । आशासे यत् इदं पुस्तकं संस्कृतप्रसारान्दोलनमार्गे मार्गदीपायते इति । श्री कृष्णशास्त्रिणां सङ्कल्पितध्येयस्य साधने यशः कामयमानः विरमामि ।

भवदीयः

गणेशचतुर्थी
भाद्रपद शुक्ल चतुर्थी
१३-०९-१९९९

वा॰रा॰ पञ्चमुखी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनुक्रमणिका

विषयः	पृष्ठसङ्ख्या
१. गभीरः प्रश्नः	१
२. बिन्दुभिः सिन्धुः	१५
३. चङ्क्रमणात् सङ्क्रमणम्	२२
४. संस्कृतगृहम्	३२
५. पाण्डित्यस्य अपरः निकषः	४०
६. एवं स्युः संस्कृतच्छात्राः	५४
७. गन्तव्यः मार्गः	६४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गभीरः प्रश्नः

१

श्रीरामः, सीता, लक्ष्मणः च अरण्ये गच्छन्ति स्म । अकस्मात् पृष्ठभागे नातिदूरात् मन्दस्वरेण कश्चन क्रन्दनध्वनिः श्रुतः । श्रीरामः लक्ष्मणं सूचितवान् यत् - ''कः रोदिति इति दृष्ट्वा आगच्छतु'' इति । यस्मात् ध्वनिः श्रुतः तत्र गतः लक्ष्मणः दृष्टवान् । तत्र कश्चन अत्यन्तं लघुः जन्तुः भूमौ विलुण्ठन् विलपति स्म । लक्ष्मणेन पृष्टः सः जन्तुः अवदत् - ''एतेन मार्गेण बहवः सञ्चरन्ति । सर्वे ममोपरि पादं स्थापयन्ति । तदा वेदनाम् असहमानः अहं 'राम राम' इति उक्त्वा तं भगवन्तं स्मरन् मदीयां पीडां विस्मरामि स्म । परन्तु अद्य सः रामः एव ममोपरि पादं स्थापितवान् । इदानीम् अहं साहाय्यार्थं कं वा आह्वयेयम् ? किं वा कुर्याम् ?'' इति ।

अद्य संस्कृतस्य स्थितिः अपि तस्य जन्तोः इव जाता अस्ति । यदा देशे अन्ये सर्वे संस्कृतं परित्यक्तवन्तः तदा संस्कृतमाता पारम्परिकरीत्या संस्कृतम् अधीयानान् छात्रान् दृष्ट्वा वा आत्मानं समादधाति स्म । परं तेऽपि यदि संस्कृतं परित्यजेयुः ?

पलायनपरं मुखम्

केभ्यश्चित् दिनेभ्यः पूर्वं देहल्यां पाण्डिचेरितः आगतः कश्चन संस्कृतज्ञः मिलितवान् । सः स्वकीयं परिचायकपत्रं (कागदखण्डं) दत्तवान्, यस्मिन् तस्य नाम्नः अग्रे MA, MPhil इति लिखितम् आसीत् । 'MA कुत्र अधीतम् ?' इति पृष्टं मया ।

सः उक्तवान् - 'अहं MA न पठितवान्', 'शिरोमणि'परीक्षायाम् उत्तीर्णः अस्मि' इति ।

'परन्तु अत्र MA इति लिखितं खलु ?'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'शिरोमणिपदवी' MA समाना !'

कदाचित् अपरः कश्चन संस्कृतच्छात्रः मिलितवान् । अहं तं पृष्टवान् - 'किं पठति भवान् ?'

'BEd' ।

'कुत्र ?'

'....विद्यापीठे'

'तत्र 'BEd' नास्ति, 'शिक्षाशास्त्री' अस्ति खलु ?'

'शिक्षाशास्त्रिपदवी' BEd समाना !'

शास्त्री, आचार्य, शिक्षाशास्त्री इति कथने सङ्कोचः, B.A, M.A, B.Ed इत्यादिकथने समाधानम् अभिमानः वा ।

एतद् अद्य संस्कृतज्ञानाम् अस्माकं साङ्केतिकरूपं पलायनपरं मुखम् । आत्महीनभावनायाः, हताशतायाः, अकर्मण्यतायाः, व्यवहारविमुखतायाः, पराक्रमहीनतायाः च परिणामेषु अन्यतमम् ।

अनुसृतः आत्मविनाशकमार्गः

विंशतिवर्षेभ्यः प्राक् आन्ध्रप्रदेशे 'विद्याप्रवीणः' इति स्नातकोत्तरपदवी दीयते स्म । छात्राः 'आधुनिकपदवी अपेक्षिता' इति अभियाचनां कृतवन्तः । अतः तत्स्थाने B.O.L (Bachelor of Oriental Languages) इति पदवी प्रदत्ता । परन्तु तेन अपि असमाहिताः छात्राः 'B.A. इत्येव पदवी आवश्यकी' इति प्रार्थितवन्तः । तदपि शासनेन अङ्गीकृतम् । परन्तु तासु कक्ष्यासु आंग्लभाषादि-आधुनिकविषयाणाम् अभावेन एतया B.A पदव्या वित्तकोषादिषु उद्योगः न लभ्यते इति पुनः 'तासु कक्ष्यासु आधुनिकविषयाणां योजनं करणीयम्' इति अनुरोधः कृतः । तदपि स्वीकृतम् अभवत् । केषाञ्चित् वर्षाणाम् अनन्तरं तदानीन्तनः मुख्यमन्त्री एन्.टि. रामरावः आज्ञां कृतवान् यत् - 'एते विद्यालयाः नाम्ना केवलं संस्कृतविद्यालयाः, संस्कृतविद्यालयः इति विशेषः कोऽपि नास्ति, अत्र पाठ्यमानाः विषयाः तु संस्कृतेतरविद्यालय-समानाः । एवं सति किमर्थम् एतेषां कृते विशेषतया धनस्य अनुदानं कर्तव्यम् ? एते सर्वे विद्यालयाः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इतरसामान्यमहाविद्यालयैः सह संयुक्ताः भवेयुः' इति । तथा च समाप्ता संस्कृतविद्यालयानां कथा आन्ध्रे । एतादृशेषु आत्मविनाशकमार्गेषु क्वचिद् वयमेव गच्छन्तः स्मः !

'संस्कृतविश्वविद्यालयाः संस्थापिताः भवेयुः' इति संस्कृतज्ञैः अनुरोधः कृतः । कतिचन संस्थापिताः, पुनः कतिचन घोषिताः च सन्ति । परन्तु किञ्चित् सावधानतया चिन्तयतु । अधीतसंस्कृतानां कृते उद्योगावसरकल्पनेन विना शून्यभविष्यत्वात् विश्वविद्यालयं प्रति छात्राः कुतः आगच्छेयुः ? छात्रैः विना क्रमशः विश्वविद्यालयाः शोधकेन्द्राणि किं न भवेयुः ? किं संस्कृतं क्रमशः ग्रन्थालयं प्रति प्रेषितं न भवेत् ? अतः अस्माकम् अभियाचनानां केन्द्रबिन्दुः तावत् उद्योगावसरसर्जनं मनसि निधाय प्राथमिक-माध्यमिकशिक्षायां संस्कृतस्य अनिवार्य-विषयत्वेन स्थापनं भवेत् खलु ? 'संस्कृतविश्वविद्यालयाः मा सन्तु' इति मम अभिप्रायः न । परन्तु 'अस्माभिः मुख्यविषयं परित्यज्य उपविषयाय युद्धं न करणीयम्' इति मम आशयः ।

आङ्ग्लेयानां संस्कृतशिक्षणस्य उद्देशः तु - संस्कृतवाङ्मयस्य अवगमनम्, इतरभाषाभिः संस्कृतग्रन्थानाम् अनुवादः च इति उभयं प्रधानतया आसीत् । स्वातन्त्र्यानन्तरं किं भारते संस्कृतशिक्षायाः उद्देशाः ते केवलं पूर्वतनाः अनुवर्तन्ते, उत अन्ये अपि सन्ति ? चिन्तनीयः अयं विषयः । किं छात्राणाम् अवगमनात्मकं ज्ञानम् अनुवादकौशलं च पर्याप्तम्, अथवा भाषायाः ज्ञानपूर्वकं प्रयोगकौशलम् आवश्यकम्? किं शास्त्रसंरक्षण-संवर्धनं, नवसाहित्यनिर्माणम् - इत्यादीनि अपि तत्र न भवेयुः ? पुनश्चिन्तनघट्टः एषः ।

किं पाठनीयं; कथं पाठनीयम् ?

कस्यापि विषयस्य पाठने भागद्वयम् - 'किं पाठनीयं; कथं पाठनीयम्' इति । सर्वदा 'किं पाठनीयम्' इति विषये एव चर्चा भवति । 'रघुवंशस्य द्वितीयः सर्गः उत द्वादशः, तद् नाटकम् अथवा एतद् नाटकं, कस्य ग्रन्थस्य कः भागः' इति विषये केवलं चर्चा भवति । वस्तुतः 'कथं पाठनीयम्'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यपि समानतया मुख्यः विषयः । एकया दृष्ट्या महत्तरः विषयः अपि । गतेषु ५० वर्षेषु कियन्ति संस्कृतसम्मेलनानि न जातानि ? कियत्यः संस्कृतसम्बन्धिकार्यशालाः न प्रवृत्ताः ? कियत्यः पत्रिकाः न प्रकाशिताः ? लेखाः लिखिताः, पुस्तकानि प्रकाशितानि, समितीनाम् उपसमितीनां च उपवेशनानि जातानि, भाषणानि अपि कृतानि । परन्तु 'कथं पाठनीयम्' इति विषयः कुत्र कियत् स्थानं प्राप्नोत् ? उदाहरणानि अल्पानि एव लभ्यन्ते । अद्यतन-आवश्यकता कथं पाठनीयम् इति विषये चिन्तनं, शोधनं, प्रयोगः, लेखनं च ।

समस्यायाः मूलं 'व्याकरण-अनुवादविधिः'

संस्कृतज्ञैः अस्माभिः एतावान् आङ्ग्लभाषाविरोधः क्रियते खलु, परन्तु अद्य संस्कृतशिक्षणे कः विधिः अस्ति ? २३०० वर्षेभ्यः पूर्वं युरोपदेशे आरब्धः, १५० वर्षेभ्यः पूर्वं मेकालेद्वारा भारतं प्रति आनीतः, आङ्ग्लविधिः 'व्याकरण-अनुवादविधिः' ! अहो विधिविलासः ! यः विधिः स्वदेशे (समग्रे ब्रिटन्मध्ये) १९२० तमे वर्षे एव English Education Board द्वारा तिरस्कृतः, (यस्य स्थाने प्रत्यक्षविधिः आनीतः) सः एव विधिः आङ्ग्लेयानां भारतात् गमनानन्तरम् अद्यापि संस्कृतशिक्षणे संस्कृतभाषायाः प्राणरसं चूषन् दृढमूलः सन् विराजतेतराम् !

तस्य परिणामः कः जातः ? 'संस्कृतपाठनं नाम 'रामः रामौ रामाः' इति रूपरटनम् इति भावः जनमानसे दृढः जातः । किञ्च, १०-१२ वर्षाणां संस्कृतशिक्षणं प्राप्य अपि बहवः संस्कृतभाषया स्वीयं परिचयं वक्तुं कष्टम् अनुभवन्ति । एवं स्थिते का कथा संस्कृतेन भाषणं, पाठनं, व्याख्यानम् इत्यादीनाम् ? नियमज्ञानम् प्राप्तं तैः, परन्तु प्रयोगसामर्थ्यं न प्राप्तम् । संस्कृतविषयकं शिक्षणम् अभवत्, संस्कृतशिक्षणं न । संस्कृतपदवीधराणां निर्माणम् अभवत्, संस्कृतज्ञानां न । 'शोधप्रबन्धाः' प्रकाशिताः । परन्तु दिशाहीनशिक्षणात् शास्त्रार्थसभाः अस्तङ्गताः । भाग्यरेखा अपि कथं परिवृत्ता, पश्यतु, लब्धाधुनिकपदवीकैः प्रतिष्ठा प्राप्ता, पारम्परिकशास्त्रपण्डितैः दीनता उपगता । प्रथमेन धनं पदं च सम्पादितम्,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयेन दारिद्र्यम् आलिङ्गितम् !

हिन्दीभाषा हिन्दीमाध्यमेन पाठ्यते । मराठी मराठीमाध्यमेन, तेलुगु तेलुगुमाध्यमेन, उर्दू उर्दूमाध्यमेन, आङ्ग्ला आङ्ग्लमाध्यमेन, जर्मन् जर्मन्माध्यमेन, स्पानिश् स्पानिश्माध्यमेन, फ्रेञ्च् फ्रेञ्चमाध्यमेन च पाठ्यते । जगति सर्वाः अपि भाषाः तत्तद्भाषामाध्यमेन पाठ्यन्ते । परन्तु संस्कृतम् एकमेव अन्यभाषामाध्यमेन पाठ्यते । परीक्षासु उत्तरमपि अन्यभाषामाध्यमेन लिख्यते । तेन च 'संस्कृत MA इति वदन्ति, परन्तु संस्कृतेन एकं वाक्यमपि अलिखित्वा, हिन्दी-आङ्ग्लभाषादिभिः लिखित्वा एते उत्तीर्णाः भवन्ति' इति आक्षेपस्य, अपवादस्य च अवसरं वयमेव कल्पयामः ।

'संस्कृतं नाम बहु कठिनम्' इति जनाः चिन्तयन्ति । वस्तुतः सर्वाः अपि भाषाः समानतया सरलाः प्रौढाः च भवन्ति । तर्हि कठिनमिति भावः कथम् उत्पद्यते ? पाठनविधेः पाठ्यपुस्तकानां च कारणात् । कश्चित् ग्रन्थं 'क' आचार्यः पाठयति चेत् छात्रैः सारल्यम् अनुभूयते । तमेव ग्रन्थं 'ग' आचार्यः पाठयति चेत् काठिन्यम् अनुभूयते । पाठ्यविषयः समानः चेदपि तस्य तस्य आचार्यस्य पाठनविधिना कठिना सरला वेति भावनिर्माणं भवति।

संस्कृतं कठिनम् इति भावनायाः मूलं कियद्गभीरतां गतम् इत्यस्य एकं सामान्यम् उदाहरणं पश्यतु । किञ्चित्कालपूर्वं नवभारत टाइम्स् पत्रिकायाः नईदिल्ली-आवृत्त्याम् एका विनोदकणिका (अपमानकणिका !) प्रकाशिता। षष्ठकक्ष्यायाः कश्चन च्छात्रः यदा केशकर्तनं कारयितुं क्षौरिकस्य समीपं गतवान् तदा क्षौरिकः तं पृष्टवान् - "वत्स, संस्कृतम् अवगन्तुम् आरब्धवान् किम् ?" छात्रः निरुत्तरः आसीत् । मासद्वयानन्तरं केशकर्तनं कारयितुं सः च्छात्रः पुनः तत्र गतवान् । क्षौरिकः पुनरपि तं पृष्टवान् - "वत्स, संस्कृतम् अवगन्तुम् आरब्धवान् किम् ?" छात्रः कोपेन पृष्टवान् - "भवान् वारं वारम् एतमेव प्रश्नं किमर्थं पृच्छति ?" क्षौरिकः हसन् उक्तवान् - "विशेषः कोऽपि नास्ति । यदा अहम् एतं प्रश्नं पृच्छामि तदा भवतः सर्वेऽपि केशाः उन्मुखाः भवन्ति, तदा मम कार्यं सरलतया सिद्ध्यति !"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अद्य समग्रे देशे संस्कृतम् कठिनम् इति यद् भयं स्थितमस्ति तस्य भयभूतस्य निर्मूलनम्, तत्स्थाने संस्कृतं सरलम् इति भावस्य निर्माणं च करणीयम् अस्ति । एतदर्थं सर्वैः प्रयत्नाः करणीयाः । तदेव अद्यतनम् आद्यं महत्तमं कर्तव्यम् अस्माकम् ।

संस्कृतपाठ्यपुस्तकानि

इदानीन्तनानि संस्कृतपाठ्यपुस्तकानि कथं सन्ति इत्यस्य उदारहणद्वयम् अत्र अस्ति – बिहारराज्यस्य षष्ठकक्ष्यायाः (संस्कृतशिक्षणस्य प्रथमवर्षम्) तृतीयपाठस्य अन्ते 'व्याकरणम्' इति शीर्षकस्य अधः 'नामधातुप्रकरणम्' अस्ति । अनन्तरपाठे उपपदसमासः (समासः नाम कः, विग्रहः कथं, तत्पुरुषः कः इति च नास्ति, साक्षात् उपपदसमासः !) उपस्थापितः अस्ति। तदनन्तरपाठेषु प्रतिपाठं सन्नन्तम्, ष्यञ्, घञ्, ल्युट्, तव्यत्, अनीयर्, ल्यप् इत्यादीनां प्रकरण- सम्बद्धानां प्रत्ययानां नामानि बहुधा प्रस्तूयन्ते ! आन्ध्रप्रदेशस्य अष्टमकक्ष्यायाः पाठ्यपुस्तके पृष्ठात्मके कस्मिंश्चिद् एकस्मिन् एव पाठे नूतनानां विंशतिधातूनां पाठः । तत्रापि 'व्यापादयामास' इत्यादीनि कष्टेन ज्ञातुं योग्यानि रूपाणि ! बिहारराज्ये प्रतिवर्षं षष्ठकक्ष्यायाः संस्कृतपुस्तकस्य १०,००,००० प्रतिकृतीनां मुद्रणं भवति। एतस्य तात्पर्यं किं सिद्ध्यति ? प्रतिवर्षं 'दशलक्षच्छात्रेषु 'संस्कृतं कठिनम्' इत्येतस्य भावस्य बीजं वयम् एव आरोपयन्तः स्मः' इति खलु ? किम् एतस्मात् संस्कृतात् अव्यक्तभयं न उत्पद्येत ? एकस्य राज्यस्य कथा एषा । सर्वेषु अपि राज्येषु पाठ्यपुस्तकानां स्थितिः प्रायः एषा एव । संस्कृतं कठिनम् इति भावः, संस्कृतात् भीतिः च अप्रयत्नेन प्रचलति निरन्तरम् !

भाष्यते इति खलु भाषा !

श्रवणं, भाषणं, पठनं, लेखनम् इत्येतेषां भाषायाः चतुर्णामपि कौशलानां शिक्षणम् आवश्यकम् । तेषु भाषणम् अत्यन्तं प्रधानम् । यतः 'भाष्यते' इति भाषा । भाष्यमाणत्वं विना संस्कृतस्य भाषात्वमेव न सिद्ध्यति । [illegible] भाषाभ्यासः अत्यन्तं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सरलतया भवति । अद्यत्वे विश्वे सर्वत्र सर्वाः भाषाः सम्भाषणमाध्यमेन पाठ्यन्ते । पाठ्यमानभाषामाध्यमेन एव, अन्यभाषा- प्रयोगेण विना एव पाठ्यन्ते । तदा छात्राणां भाषाश्रवणसंस्कारः भवति । जले अवतीर्णानां तु यथा तरणाभ्यासः भवत्येव तथा संस्कृतमाध्यमाद् संस्कृतपरिवेषे स्थितः संस्कृतेन वदत्येव । शिशोः मातृभाषायाः अभ्यासे 'दुग्ध-भोजनादिप्राप्तिनिमित्तं भाषणीयम् एव' इति अनिवार्यता अस्ति इत्यपि एकं कारणं भवति । तथैव संस्कृतमाध्यममपि अनिवार्यतां कल्पयत् संस्कृताभ्यासे सहकरोत्येव । छात्रेषु धैर्यम् उत्साहः च निर्मातव्यः । तदा ते भाषणस्य आरम्भं करिष्यन्ति । धैर्यदानाय, छात्राः दोषान् कुर्वन्ति चेदपि आरम्भस्तरे दोषपरिमार्जनं न कर्तव्यम् । क्रमशः ते सुष्ठु रूपं ज्ञास्यन्ति । तद्विषये चिन्ता न कार्या । दोषप्रदर्शनम् अपि सम्भाषणाभावस्य एकं प्रमुखं कारणम् ।

यदि भारते शिशुकक्ष्यायाम् एव विदेशीयभाषा आङ्ग्लभाषा आङ्ग्लमाध्यमेन पाठ्यते, येन च वर्षाभ्यन्तरे शिशवः आङ्ग्लभाषणसमर्थाः भवन्ति, तर्हि तत्तत्प्रादेशिकभाषासु विद्यमानैः संस्कृतशब्दैः युक्तया 'सरलसंस्कृतम्' इति विशिष्टतया विद्यमानया संस्कृतभाषया (न तु सरलीकृतसंस्कृतेन) पाठ्यते चेत्, तादृशरूपेण संस्कृतमाध्यमेन सम्भाषणमाध्यमेन पाठ्यते चेत्, किमर्थं शिशवोऽपि संस्कृतसम्भाषण- समर्थाः न भवेयुः ? अवश्यमेव भवन्ति - इत्यस्ति प्रयोगसिद्धः अनुभवः ।

कल्पनां करोतु यत् - 'आगामिनि वर्षे भारते विद्यमानाः सर्वे अपि संस्कृतस्य शिक्षकाः, आचार्याः, व्याख्यातारः, प्राध्यापकाः, प्रवाचकाः, प्राचार्याश्च संस्कृतं संस्कृतमाध्यमेन एव पाठयिष्यन्ति' इति । तदा एकस्मिन् एव वर्षे ३ कोटिच्छात्राः संस्कृतेन सम्भाषणसमर्थाः भविष्यन्ति ! यतः विभिन्नराज्येषु द्वितीयकक्ष्यातः स्नातकोत्तरकक्ष्यापर्यन्तं संस्कृतं पठन्तः सामान्यतः ३ कोटिच्छात्राः सन्ति । भारतस्य जनसङ्ख्यायाः त्रिप्रतिशतं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(३%) जनाः संस्कृतभाषया वक्तुं समर्थाः ! वयं संस्कृतज्ञाः एव विना परसाहाय्यं, विना दैन्यं, विना पलायनम् एव एतद् साधयितुं शक्नुयाम ।

संस्कृतमाध्यमेन पाठने समस्याः (?)

'संस्कृतमाध्यमेन संस्कृतम्' इत्येतं विषयं स्वीकृत्य यदि वयं प्राथमिक-माध्यमिक-विद्यालयानाम् आचार्यैः मिलामः तर्हि ते वदन्ति यत् - 'स्नातक-स्नातकोत्तरस्तरयोः, - यत्र संस्कृतस्य आचार्याणां निर्माणं भवति - तत्रैव संस्कृतमाध्यमं नास्ति, येन च आचार्याः एव स्वयं भाषणसमर्थाः न, अतः प्रथमं तत्र संस्कृतमाध्यमम् आनयतु' इति । यदा महाविद्यालयान्, विश्वविद्यालयान् गत्वा तत्रत्यान् प्राध्यापकान् निवेदयामः तदा ते वदन्ति यत् - 'आरम्भस्तरतः संस्कृतमाध्यमं नास्तीति कारणतः उन्नतस्तरे संस्कृतमाध्यमस्य आरम्भाय च्छात्राः अनधिकारिणः भवन्ति । अतः प्राथमिकस्तरे प्रथमं संस्कृतमाध्यमं भवतु' इति । एवं परिस्थितिः तादृशी अभवत् यत् विवाहाभावकारणतः उन्मादं प्राप्तवतः युवकस्य यादृशी आसीत् । विवाहः न जातः इति कारणतः युवकः उन्मत्तः जातः आसीत् । उन्मादस्य अपगमनेन विना तस्य विवाहः न भवति स्म, विवाहेन विना उन्मादः न अपगच्छति स्म !

केचन आचार्याः तु 'पाठ्यक्रमपरिवर्तनेन विना संस्कृतमाध्यमं न शक्यं, यतः छात्रैः परीक्षासु तदनुसारमेव उत्तराणि लेखनीयानि' इति वदन्ति । पाठ्यक्रमपरिवर्तनसम्बन्धे शिक्षामन्त्रिणः, शासकीयाः अधिकारिणः वा पृच्छामः चेत् ते वदन्ति - "तत्र वयं किं जानीमः ? भवन्तः संस्कृत-आचार्याः एव खलु निर्णेतारः ? तथैव कुर्वन्तु" इति ।

आचार्यान् सानुरोधं वदामः चेत् तस्य विपरीतः एव परिणामः भवति, यतः सः अभ्यासाभावात् संस्कृतमाध्यमेन पाठने स्वयं कष्टम् अनुभवतीति कारणाद्, तस्मिन् वयसि अभ्यासं कर्तुं सङ्कोचकारणाद् वा 'संस्कृतेन सम्भाषणस्य का आवश्यकता ?' इति, 'संस्कृतम् इदानीं यथा अस्ति तथैव तिष्ठेत्, नो चेत् सा पुनः अपरा अपभ्रंशभाषा भवेत्' इति, 'संस्कृतं कदापि व्यवहारभाषा नासीत्' इति वा विभिन्नान् वादान् उपस्थापयति, येन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तस्य रक्षणं भविष्यति ।

संस्कृतमाध्यमेन पाठनं विना संस्कृतस्य उत्थानं न भविष्यति । कृष्णपक्षे शशिनः स्थितिः यथा तथा भवेत् संस्कृतस्य । 'संस्कृतमाध्यमेन पाठ्यते चेत् छात्राणाम् अवगमनं न भवति' इति आचार्याः वदन्ति । तर्हि प्रश्नः उद्भवति यत् - 'संस्कृतम् इतरभाषाणाम् अपेक्षया कठिनम्' - इति अस्माभिः किं पराजयः अङ्गीकर्तव्यः ?, उत यथा छात्राः अवगच्छेयुः तथा मया सरलतया पाठनस्य कौशलं सम्पादनीयमिति चिन्तनीयम्' इति । १९२० तमे वर्षे यदा इङ्ग्लण्ड्मध्ये 'आङ्ग्लभाषा आङ्ग्लमाध्यमेन पाठनीया' इति तत्रत्यशासनेन नियमः कृतः तदा आङ्ग्ल-आचार्यैः सः नियमः न अङ्गीकृतः । अतः तत्रत्याः चत्वारि वर्षाणि यावत् तस्य नियमस्य क्रियान्वयनं कर्तुं न शक्ताः । आचार्याः स्वस्य आङ्ग्लभाषा-भाषणसामर्थ्याभावाद् तस्य विरोधं कृतवन्तः आसन् । पश्चात् व्यापकरूपेण आचार्यप्रशिक्षणं कृतम् । तेन च परिवर्तनं साधितम् ।

हिब्रूपुनरुत्थानस्य उदाहरणम्

अद्य संस्कृतेन धाराप्रवाहरूपेण शुद्धतया च सम्भाषणे समर्थानां निर्माणं करणीयम् । न केवलं तावत्, अद्य देशे संस्कृतसम्भाषणसमर्थाः बहवः सन्ति । अद्यतनी आवश्यकता सम्भाषणसमर्थानां न, अपि तु संस्कृतसम्भाषणशीलानाम् । तादृशानां निर्माणे संस्कृतमाध्यमं महते लाभाय भवति । अत्र इस्रैलदेशस्य उदाहरणम् आदर्शरूपेण अस्ति । बेन् येहूदः मित्रशिक्षकैः सह विद्यालयेषु हिब्रूभाषां हिब्रूमाध्यमेन पाठयितुम् उद्युक्तः अभवत् । विद्यालयस्य प्रबन्धसमितिजनाः तस्य विरोधं कुर्वन्ति स्म । एतान् शिक्षकान् विद्यालयात् निष्कासयन्ति स्म । एते अन्यान् विद्यालयान् प्रविश्य तत्र पुनः हिब्रूमाध्यमस्य आरम्भं कुर्वन्ति स्म । स्वस्य वेतनस्य कञ्चन भागं च्छात्रेभ्यः (बालेभ्यः) उत्कोचरूपेण वितरन्ति स्म, येन ते छात्राः कुत्रापि न वदेयुः यत् 'अस्माकं शिक्षकः हिब्रूमाध्यमेन पाठयति' इति। ते च आचार्याः विद्यालयं प्रति गमनागमनसमये मार्गे प्रातः घण्टाद्वयं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सायं घण्टाद्वयं च बालैः सह क्रीडन्ति स्म । यतः बालानां स्नेहं सम्पाद्य तेषां हिब्रूसम्भाषणशिक्षणं करणीयम् इति ते चिन्तयन्ति स्म । क्रमशः ते बालाः न केवलं स्वयं हिब्रूभाषया उक्तवन्तः, अपि तु गृहे मातापितॄन् अपि हिब्रूसम्भाषणाय अङ्गीकारितवन्तः । एतत् साधयितुं हिब्रूशिक्षकाः विद्यालयपाठनसमयं विहाय प्रतिदिनं चतुर्घण्टानां शारीरकश्रमं सहन्ते स्म । एतत् कस्मिन् कालखण्डे जातम् ? १८८२ तः १८९२ पर्यन्तम् । १८९२ तमे वर्षे हिब्रूमाध्यमशिशुमन्दिरम् आरब्धवन्तः ते । परन्तु ४ वर्षाणि यावत् तत्र एकमपि छात्रं ते न प्राप्तवन्तः । पश्चात् स्वीयान् सुतान् एव तत्र प्रेषितवन्तः । तथा आरब्धा शिशुकक्ष्या प्रथमा, द्वितीया इति क्रमशः हिब्रूमाध्यमकक्ष्याः विद्यालय-महाविद्यालय-विश्वविद्यालयत्वेन वृद्धाः । यथा अद्य भारते आङ्ग्ल-माध्यमविद्यालयेषु प्राप्तशिक्षणाः छात्राः जीवने अग्रे अपि आङ्ग्लमाध्यमेन एव व्यवहारं कुर्वन्ति तथा १९२५ तमवर्षतः पूर्वमेव तत्र इस्त्रैलमध्ये हिब्रूमाध्यमविद्यालयेभ्यः निर्मिताः युवानः हिब्रूभाषया एव व्यवहारं कृतवन्तः । हिब्रूभाषिणां नवपरम्परायाः निर्माणम् अभवत् । एतत् कार्यं कृत्वा तत्रत्याः हिब्रूशिक्षकाः स्वमेधया एव तदानीन्तनस्य टर्कशासनस्य विरोधे सत्यपि नवनिर्माणं साधितवन्तः ।

संस्कृतेतरभाषाक्षेत्रेषु तद्भाषाशिक्षणविषये नानाविधप्रयोगाः भवन्ति - आरम्भस्तरे कथं पाठनीयम्, अनन्तरस्तरे, प्रगतस्तरे च कथम् इत्यादिषु विषयेषु । तादृशं गवेषणं, प्रयोगः, अनुसन्धानं वा संस्कृतक्षेत्रे.. ??

सर्वरोगोपशमनम्

एतादृशं संस्कृतस्य सर्वरोगोपशामकं 'संस्कृतस्य संस्कृतमाध्यमेन पाठनम्' - इत्येतत् तत्त्वं कथं क्रियान्वितं भवेत् ? कथमिदं सिद्ध्येत् - इत्येव अद्य प्रश्नः अस्ति । महान् प्रश्नः अस्ति । गभीरः प्रश्नः अस्ति । तस्य प्रश्नस्य उत्तरे एव संस्कृतस्य भविष्यं निहितम् अस्ति । एकैकः संस्कृतज्ञः अपि एतस्य प्रश्नस्य उत्तरं दातुं प्रयतेत ।

सौभाग्येन गतपञ्चदशवर्षेषु बहूनां परिश्रमस्य फलतः अद्य 'सरलसम्भाषणपद्धतिः' इति काचित् अपूर्वा, प्रभाविनी, विनूतना च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतशिक्षणपद्धतिः संस्कृतभारत्या वर्धिता अस्ति। विविधस्तरेषु पाठनाय आकर्षकपाठ्यक्रमः अपि रचितः अस्ति । संस्कृतस्य नवोत्थानं सम्पादयितुं तन्त्रज्ञानं सिद्धम् अस्ति ।

प्राथमिक-माध्यमिक-पूर्वस्नातक-स्नातक-स्नातकोत्तरादिषु सर्वेषु अपि स्तरेषु एककाले एव संस्कृतमाध्यमम् आनेतुं शक्यते । कथम् इत्युक्ते सर्वासु अपि कक्ष्यासु वर्षारम्भे पक्षं यावत् सेतुपाठकरूपेण संस्कृतसम्भाषणशिक्षणवर्गं चालयतु, (तदर्थं पाठ्यक्रमः सिद्धः अस्ति) पर्याप्तम्, पश्चात् भवान् आवर्षं संस्कृतेन एव पाठयितुं शक्ष्यति । संस्कृतेन पाठनम् इत्यत्र न किमप्यस्ति तादृशं कष्टसाध्यम् । शीतलजलेन स्नानाय उद्युक्तः कश्चन शैत्यभयेन जलस्पर्शात् पूर्वं यथा चिन्तयति तथा संस्कृतमाध्यमविषये भयमिदम् । परन्तु एकवारं जले अवतरणानन्तरं तावान् आनन्दः भवति यत् उपरि आगन्तुम् इच्छा एव न भवति !

केचन उपायाः

तर्हि लक्ष्यं साधयितुं के उपायाः ? स्थलाभावाद् अत्र प्रकृतम् अस्माभिः निधातव्यानि कानिचन पदानि केवलं सूच्यन्ते –

१. 'संस्कृतं संस्कृतमाध्यमेन' इति महत् आन्दोलनम् उपस्थापनीयम् ।
२. वर्षारम्भे सर्वासु कक्ष्यासु सम्भाषणवर्गाणां सञ्चालनं करणीयम् ।
३. ३-४ वर्षाणां परिणामकेन्द्रिता, सुनिश्चिता, समयबद्धा च कार्यक्रमयोजना करणीया ।
४. प्रतिराज्यं, कैश्चिद् धीरैः पुरोगामिभिः आचार्यैः प्रयोगाणाम् आरम्भं कृत्वा स्थाने स्थाने 'आदर्श'निर्माणं करणीयम् ।
५. राज्यशासनैः, संस्कृतविश्वविद्यालयैः, सामान्यविश्वविद्यालयैः, केन्द्रीय-विद्यालयसङ्घटनेन, केन्द्रीयमाध्यमिकशिक्षामण्डल्या, सेवासंस्थाभिः च नियमः घोषणीयः यत् 'कक्ष्यासु संस्कृतेन पाठनम्, परीक्षासु संस्कृतेन लेखनम्' ।
६. प्रतिजनपदं (प्रतिजिल्ला) आचार्यप्रशिक्षणवर्गः करणीयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राथमिक-माध्यमिकादि-विभिन्नस्तरेषु शासकीययोजनया प्रशिक्षणं व्यवस्थापनीयम् । सेवासंस्थानां माध्यमेन च प्रशिक्षणं करणीयम् ।

७. नूतनपद्धत्या पाठनार्थं तदनुसारं नूतनतया पाठ्यपुस्तकानां लेखनम्, शिक्षकमार्गदर्शिकानामपि प्रकाशनं च करणीयम् ।

८. प्रतिवर्षं, प्रतिराज्यं संस्कृतशिक्षणपद्धतिविषये कार्यशालाः, गोष्ठ्यः च आयोजनीयाः ।

९. सर्वेषु सम्मेलनेषु, सभासु च एकः मुख्यः विषयः एषोऽपि भवेत् यत् संस्कृतेन पाठनम् ।

१०. बहूनां, नूतनविधानां, छात्रोपयोगिनां, शिक्षकोपयोगिनां च पुस्तकानां प्रकाशनम्, ध्वनिमुद्रिका-वीडियो इत्यादीनां च प्रकाशनं करणीयम् ।

११. आगामिवर्षत्रयं यावत् देशे सर्वासामपि संस्थानां, सङ्घटनानां, संस्कृतविदुषां च चिन्तनम् एकमुखं स्यात् - संस्कृतेन पाठनम् । तादृशं केन्द्रीभूतचिन्तनं विना, महत्याः शक्त्याः सम्पादनेन विना च एतत् कार्यं न भवेत् ।

१२. सेवासंस्थानैः सञ्चाल्यमानानां संस्कृतपरीक्षाणामपि पाठ्यक्रम-परिष्कारः करणीयः ।

१३. छात्राणाम् आचार्याणां च मध्ये संस्कृतमाध्यमेन पठनपाठनं च सरलतमं भवति इति भावनिर्माणम्, विश्वासोत्पादनं च करणीयम् ।

१४. विविधस्तरीयच्छात्राणां कृते सेतुपाठाः रचनीयाः ।

१५. संस्कृतपत्रिकासु भाषाशिक्षणसम्बन्धे लेखनानि प्रकाशनीयानि ।

१६. नूतनतया आचार्याणां नियुक्तिसमये विज्ञापनासु एव स्पष्टीकरणीयं यत् - 'प्रार्थिनां संस्कृतमाध्यमेन पाठयितुं सामर्थ्यम् आवश्यकम्' इति । अपि च साक्षात्कारेषु अर्थिनः संस्कृतसम्भाषणसामर्थ्यम् अस्ति उत न इति परीक्षा करणीया । एतेन शीघ्रमेव संस्कृतच्छात्राः संस्कृतभाषणाभ्यासं करिष्यन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१७. शिक्षाशास्त्रि (BEd) कक्ष्यासु प्रथमं संस्कृतमाध्यमम् आनेतव्यम् । कठोरतया तत् पदं स्थापनीयम् । संस्कृतमाध्यमेन पाठनं कथम् इत्येषः विषयः स्वतन्त्रविषयत्वेन पाठ्यक्रमे योजनीयः ।

१८. संस्कृतच्छात्राणां विशेषवर्गाः, पुरस्काराः च व्यवस्थापनीयाः ।

१९. संस्कृतमाध्यमम् इति नियमस्य पूर्णतः क्रियान्वयनार्थं विशेषसमित्याः, समितीनां वा घटनम्, अथवा बलवत्याः कस्याश्चिद् व्यवस्थायाः वा रचना करणीया ।

२०. संस्कृतविद्यालयानां, विश्वविद्यालयीयानां संस्कृतविभागानां च प्रशासकीयव्यवहाराः संस्कृतेन भवेयुः, येन च विद्यालये संस्कृतपरिवेषनिर्मणं भवेत् ।

२१. भाषाप्रयोगालयसहितानां प्रशिक्षणकेन्द्राणां प्रतिष्ठापनम्, प्रशिक्षणाय आचार्याणां प्रेषणं च भवेत् ।

२२. अग्रिमेषु त्रिषु चतुर्षु वा वर्षेषु केन्द्रस्य, राज्यानां वा वित्तीय-अनुदानेषु अधिकस्य भागस्य व्ययः संस्कृतमाध्यमेन पाठनार्थं कृतः चेत् तत् शैक्षणिकक्रान्त्यै भवेत् ।

२३. संस्कृतभाषाशिक्षणशोधप्रतिष्ठानस्य विभागस्य वा स्थापनं करणीयम् ।

२४. संस्कृतभाषाशिक्षणशोधपत्रिका आरब्धव्या ।

२५. प्राथमिकशिक्षा, माध्यमिकशिक्षा, विश्वविद्यालयः, संस्कृत-विश्वविद्यालयः, संस्कृतपाठशाला, केन्द्रीयविद्यालयः, केन्द्रीय-माध्यमिकशिक्षामण्डली, केन्द्रीयविद्यापीठानि, विद्यापीठीय-शिक्षाशास्त्रिविभागः, राष्ट्रियसंस्कृतसंस्थानम्, आचार्यप्रशिक्षण-विद्यालयः इत्येतावतां क्षेत्राणां प्रमुखाणां संवादः/गोष्ठ्यः/ कार्यशालाः प्रादेशिकस्तरे क्षेत्रीयस्तरे वा तदा तदा भवेयुः, येन सर्वेषाम् एका दिशा भवेत्, परस्परसहयोगः भवेत्, तथा च अविरोधसङ्घटितप्रयत्नः भवेत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निर्णायकः घट्टः

इतिहासे केचन निर्णायकाः घट्टाः आयान्ति। संस्कृतस्य इतिहासे इदानीं कश्चन तादृशः निर्णायकः घट्टः समागतः अस्ति । संस्कृतस्य जीवनमरणयोः प्रश्नः एषः । उत्तरम् अस्माभिः संस्कृतस्य च्छात्रैः आचार्यैः अनुरागिभिश्च सम्भूय वक्तव्यम् अस्ति । कवेः श्रीमतः महाबलेश्वरभट्टस्य गीतस्य पङ्क्तिः मनसि गुञ्जति - 'संस्कृतेन पाठनम्, संस्कृताय जीवनम्' !

बन्धो ! कन्नडभाषायाः हितसंरक्षणं कर्णाटकं करोति । मराठ्याः महाराष्ट्रं करोति। हिन्द्याः केन्द्रशासनं करोति । प्राशासनिक-अधिकारिणः, आङ्ग्ल-शिक्षिताः च मिलित्वा आङ्ग्लहितसंरक्षणं कुर्वन्ति । अल्पसङ्ख्याकतुष्टीकरणनीतिपटवः उर्दूहितसंरक्षणं कुर्वन्ति । संस्कृतस्य हितसंरक्षणं के कुर्वन्ति ? वयं संस्कृतज्ञाः एव कुर्याम ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बिन्दुभिः सिन्धुः

२

रोगस्य मूलं सम्यग् ज्ञातं चेत् चिकित्सा उत्तमा भवति । अतः अद्य संस्कृतक्षेत्रस्य मूलं किम् इति अस्माभिः सम्यग् अध्येतव्यं भवेत् । भारतस्य राजकीयस्वातन्त्र्यस्य पञ्चाशत्तमे वर्षे तथा च शताब्दस्य अन्तिमघट्टे संस्कृतज्ञानाम् अस्माकम्, अस्मत्कृतीनां च आत्मनिरीक्षणस्य समयः एषः । 'संस्कृतस्य योग्यस्थानकल्पनस्य, प्रोत्साहनस्य, आश्रयस्य वा अभावः' इति शासनोपरि; 'आङ्ग्लमोहः' इति समाजोपरि; 'रुचिः नास्ति' इति छात्राणामुपरि; 'कालांशान् न ददाति' इति विद्यालयस्य प्रधानाचार्योपरि – इत्येवंप्रकारेण इतरेषाम् उपरि वयम् अत्यन्तं सरलतया दोषारोपणं कर्तुं शक्नुमः । परन्तु तेन संस्कृतस्य समस्यायाः परिहारः न भवति । अस्माभिः संस्कृज्ञैः किं कृतं, किं न कृतम्; किं कर्तव्यं, किं न कर्तव्यम् इत्येवं चिन्तनं करणीयम् ।

यः कोऽपि जनः समस्याः कथयितुं शक्नोति । वैफल्यस्य कारणानि च सर्वः अपि वदेत् । तत्र विशेषः नास्ति । अस्माभिः तु परिहारचिन्तनं करणीयम् । समस्यामात्रवक्तॄणां, न्यूनताकेवलोल्लेखयितॄणां, रोदनशीलानां, कृतिशून्यानां च कृते एतस्मिन् जगति स्थानं नास्ति । परिहारसाधकानां, साहसशीलानां, यशसः कथाकथयितॄणां केवलं समाजे आदरः भवति, सम्मानः भवति । इतरेषु दोषारोपणेन अस्माभिः अस्माकम् अकर्मण्यतायाः, परिस्थितेः अनवगमनस्य वा गोपनं कृतं भवति । 'अन्धकारः, सर्वत्र अन्धकारः' इति कथनेन अन्धकारः न अपगच्छति खलु । अस्माभिः मौनेन एकः दीपः ज्वालनीयः ।

गतेषु सप्तदशवर्षेषु संस्कृताय भारते प्रवासं कुर्वता मया दृष्टं यद् यत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्र बहुषु स्थानेषु एतादृशाः सन्ति ये मौनरूपेण, प्रसिद्धिं विना, अविरतरूपेण संस्कृतस्य पठन-पाठनादिकं, प्रचारकार्याणि च कुर्वन्ति । वस्तुतः तादृशानां तपस्विनां कारणतः एव संस्कृतम् अद्यापि जीवति । यथा सुतानां संवर्धनेन एव मातृत्वस्य सार्थकता अस्ति तथा संस्कृतप्रचारकार्येण एव संस्कृतज्ञानाम् अस्तित्वस्य सार्थक्यम् अस्ति । संस्कृतप्रचारः एव जीवनम् ।

यथा बिन्दूनां संयोगेन सिन्धुः भवति तथा एकैकेन संस्कृतज्ञेन, संस्कृतच्छात्रेण, संस्कृतस्य अनुरागिणा च स्वस्य स्वस्य स्थाने आवर्षं यावत् अविरतं च लघूनि अपि संस्कृतकार्याणि क्रियमाणानि एव यदि भवन्ति तर्हि एकैकशः चेदपि देशव्याप्तानां लक्षाधिकसंस्कृतज्ञानां प्रयत्नानां सम्मिलित-परिणामः तावत् अपूर्वः, सुदूरगामी च भवेत् ।

किं, कुत्र, कथम् ?

कतिचन एतादृशानि कार्याणि सन्ति, यानि अविरतं व्यापकं च कुर्मः चेत् महान् लाभः भवेत् । यथा – बहुजनाः संस्कृतं पठितुम् इच्छन्ति । परन्तु कुत्र, कथमिति च ते न जानन्ति । संस्कृतभारत्याः पत्राचारद्वारा संस्कृतशिक्षणयोजना विविधभारतीयभाषाणां माध्यमेन अस्ति । यदि सर्वः संस्कृतानुरागी अपि स्वस्य ग्रामे अथवा नगरे जनसम्पर्कं करोति, पत्राचारद्वारा संस्कृतशिक्षणयोजनायाः प्रचारं करोति, प्रतिदिनमपि एकैकं शिक्षार्थिनं सङ्गृह्णाति, तर्हि संस्कृताध्येतॄणां संख्या वर्धेत । पत्राचारद्वारा शिक्षणयोजनायै वर्षस्य ३६५ दिनानि अपि शिक्षार्थिसङ्ग्रहं कर्तुं शक्नुमः, पश्चात् तेषां शिक्षार्थिनां विशेषपाठनमपि कर्तुं शक्नुमः ।

'संस्कृतं वदतु' इति द्वात्रिंशत्पृष्ठात्मकं कोशस्थापनयोग्यम् एकं लघु पुस्तकम् अस्ति, यस्य मूल्यं केवलं रूप्यकद्वयम् । (अद्यत्वे तु चषकपरिमितस्य चायस्य मूल्यमपि रूप्यकद्वयतः अधिकं भवति ।) तस्मिन् पुस्तके नित्यव्यवहारोपयोगीनि द्विशताधिकानि संस्कृतवाक्यानि, उपशताः शब्दाः प्रादेशिकलिप्या प्रादेशिकभाषाऽर्थेन सह सन्ति । ये जनाः तद्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुस्तकं पठन्ति पश्यन्ति वा, तेषु तावत् संस्कृतस्य सरलतायाः व्यावहारिकतायाः च विषये महान् प्रभावः भवति । देहल्यां १९९७ तमे वर्षे मासत्रये संस्कृतशिक्षकाः एव एतस्य पुस्तकस्य एकलक्षाधिकप्रतिकृतीनां विक्रयणं कृतवन्तः ।

तस्य अर्थः एकलक्षाधिकपरिवारेषु व्यावहारिकसंस्कृतस्य प्रवेशः जातः इति । पुणेनगरे गतवर्षे विनायकचतुर्थ्याः अवसरे यत्र मुख्यस्थाने गणेशोत्सवः सार्वजनिकरूपेण भवति तत्र संस्कृतभारत्याः केचन कार्यकर्तारः जनानां मध्ये गत्वा पुस्तकविक्रयणं कुर्वन्तः द्वित्रेषु दिनेषु एव दशसहस्रपुस्तकानां विक्रयणं कृतवन्तः । विद्यालयस्य प्रधानाचार्येण सह वार्तालापं करोति चेत् विद्यालयस्य सर्वे छात्राः पुस्तकानि स्वीकुर्युः । भवतः नगरे १०-१५ विद्यालयाः सन्ति चेत् विद्यालयानां द्वारा ५००० पुस्तकानि पक्षाभ्यन्तरे विक्रीतानि भवेयुः । नगरे यावन्तः कार्यालयाः सन्ति तेषु प्रत्येकं कार्यालयं गत्वा सर्वे एतद् पुस्तकं क्रीणीयुः इति निवेदनं कर्तुं शक्यते । उद्योगपतिः निवेदनीयः यत् भवान् एतानि क्रीत्वा भवतः संस्थायां कार्यं कुर्वद्भ्यः सर्वेभ्यः एकैकं ददातु इति । सर्वमपि निवेदयितुं शक्नुमः यत् भवान् ५०/१००/२५० प्रतिकृतीः क्रीणातु, परिचितेभ्यः ददातु च इति । कस्मिंश्चित् गृहे विवाहादिमङ्गलकार्यक्रमः उत्सवः वा भवति चेत् तं गृहस्वामिनं निवेदयतु यत् भवान् एतेन पुस्तकेन (उपायनरूपेण दत्त्वा) अतिथीनां स्वागतं करोतु इति । संस्कृतशिक्षकः स्वच्छात्रान् वक्तुं शक्नोति यत् 'प्रत्येकमपि छात्रः यावदधिकं शक्यते तावतां पुस्तकानां विक्रयणं करोतु । संस्कृतप्रचाराय एतद् । यः अत्यधिकं विक्रीणीते तस्मै पुरस्कारः दीयते' इति । एतेन प्रकारेण 'संस्कृतं वदतु' इति पुस्तकस्य विक्रयणस्य व्यापक-अभियानेन कश्चन प्रभावः समाजोपरि भवत्येव । एतद् कार्यमपि वयं वर्षस्य ३६५ दिनानि अपि निर्बाधं कर्तुं शक्नुयाम । पुस्तकानां निमित्तं प्रान्तीयाय केन्द्रीयाय वा कार्यालयाय पत्रं लिखन्तु ।

केवलं 'संस्कृतं वदतु' पुस्तकानां विक्रयणम् इति चिन्तनीयं नास्ति, अन्यानि पुस्तकानि अपि सन्ति । तथा च संश्लेषकाणि (stickers),

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भित्तिपत्राणि, ध्वनिमुद्रिकाः (cassettes), शुभाशयपत्राणि इत्यादीनि अपि सन्ति । जन्मदिनादिषु उपायनदानावसरे, स्पर्धासु, प्रतियोगितासु विजेतृभ्यः पुरस्कारदानावसरे उपरिसूचितानि पुस्तकादीनि उपायन-पुरस्काररूपेण दातव्यानि इति जनाः प्रबोधनीयाः ।

भाषितरूपस्य प्रचारः

विद्यालयेसु अथवा विविध-सांस्कृतिक-सामाजिक-धार्मिक-संस्थासु छात्रेभ्यः नानाविधस्पर्धाः आयोजिताः भवन्ति । अद्य संस्कृतसम्बन्धे स्पर्धाः (प्रतियोगिताः) इत्युक्ते गीताकण्ठपाठस्पर्धाः, अन्त्याक्षरीप्रतियोगिता अथवा गीतगानप्रतियोगिता भवन्ति । ताः भवन्तु नाम । परन्तु यदि संस्कृतेन भाषणस्पर्धा, सम्भाषणप्रदर्शनस्पर्धा, कथाकथनप्रतियोगिता, विनोदकणिका-कथनप्रतियोगिता इत्येवं संस्कृतभाषणकेन्द्रिताः प्रतियोगिताः भवन्ति तर्हि संस्कृतस्य भाषितरूपस्य प्रचारः साध्यः ।

यदा इस्रेलदेशे हिब्रूभाषापुनरुज्जीवन-आन्दोलनं प्रचलति स्म, तदा ते सर्वविधसभासु (यस्यकस्यापि विषयस्य सभा भवेत् नाम, तासु सर्वासु) युवक-युवतीनां द्वारा हिब्रूभाषया लघुभाषणानि कारयन्ति स्म, हिब्रूभाषणम् अभिमानविषयः इति भावनिर्माणं कुर्वन्ति स्म । तादृश-युवक-युवतीनां सम्माननं च कुर्वन्ति स्म । तेन युवमनस्सु हिब्रूनिष्ठा प्रवृद्धा, सुदृढा च जाता । तथैव अद्य सामाजिके, सांस्कृतिके, धार्मिके वा कस्मिंश्चिदपि कार्यक्रमे, सर्वत्र च अवसरं सम्पाद्य बालानां द्वारा संस्कृतभाषणस्य, सम्भाषणस्य, कथायाः, महापुरुषवाक्यकथनस्य वा कार्यक्रमः कल्पनीयः । यथा सभारम्भे प्रार्थना अनिवार्या जाता तथा कश्चन संस्कृतकार्यक्रमः सभायाः अविभाज्यम् अङ्गं करणीयम् । संस्कृतेन सह प्रतिष्ठायाः, आदरस्य, सम्मानस्य च भावः योजनीयः । तदा संस्कृतं युवजनचित्तग्राह्यं भवति ।

एकैकस्मिन् राज्ये एकैककक्ष्यातः संस्कृतशिक्षणस्य आरम्भः भवति । यस्याः कक्ष्यायाः आरभ्य संस्कृतस्य शिक्षणस्य आरम्भः भवति ततः पूर्वतनकक्ष्यां गत्वा वयं तेभ्यः च्छात्रेभ्यः सम्भाषणशिबिरं चालयेम,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथवा सरलसंस्कृतस्य परिचयं कारयेम । अपि च 'आगामिवर्षे सर्वे संस्कृतं स्वीकुर्युः' इति प्रेरयेम । तेन संस्कृतच्छात्रसंख्या वर्धेत । कतिचनवर्षाणि यावत् एवं कुर्मः चेत् तदा नूतनशिक्षकाणां नियुक्तेः आवश्यकता भवति । तदा सा परिस्थितिः निर्मिता भवेत् यत्र संस्कृतशिक्षकाणां महती आवश्यकता सर्वत्र भवेत् निरुद्योगसमस्या च निवारिता भवेत् । परिणामतः संस्कृतक्षेत्रे नवोत्साहस्य, विकासस्य, उत्थानस्य च परिवेषः भविष्यति । पश्चात् संस्कृतं स्वयमेव विकसिष्यति ।

श्रावणीयाः उत्साहवार्ताः

प्रकृतं भारते अष्ट संस्कृतविश्वविद्यालयाः सन्ति, पुनः द्वयोः घोषणा जाता अस्ति, नेपाले एकमस्ति, एवम् आहत्य एकादश संस्कृतविश्वविद्यालयाः । ९० विश्वविद्यालयेषु संस्कृतस्य स्नातकोत्तरकक्ष्याः सन्ति । संस्कृतस्य पारम्परिकविद्यालयाः महाविद्यालयाः च पञ्चसहस्रं सन्ति । राष्ट्रिय-संस्कृतसंस्थान-सम्बद्धानि विद्यापीठानि आदर्शविद्यालयाः च शताधिकाः सन्ति । सप्तसु राज्येषु प्राथमिक-उच्चप्राथमिक-माध्यमिक-उच्चमाध्यमिक- स्तरेषु संस्कृतम् अनिवार्यविषयरूपेण अस्ति । (मध्यप्रदेशः, बिहारः, उत्तरप्रदेशः, देहली, राजस्थानं, गुजरात, हिमाचलप्रदेशः इत्येतेषु) विद्याभारती-अखिलभारतीयशिक्षासंस्थानस्य १५,००० विद्यालयेषु १५ लक्षं छात्राः संस्कृतं पठन्ति । तेषु द्वितीयकक्ष्यातः एव संस्कृतपठनम् अनिवार्यम् । १०-अधिकसंस्थानैः सरलसंस्कृतपरिक्षाः सञ्चाल्यन्ते । (एकैकसंस्थानद्वारा लक्षाधिक-च्छात्राः परीक्षाः स्वीकुर्वन्ति ।) अष्टस्थानेभ्यः पत्राचारद्वारा संस्कृतशिक्षणयोजना चलति । त्रिकोटितः अपि अधिकसंख्याकाः छात्राः प्रतिवर्षं संस्कृतं पठन्ति । सप्त संस्कृतसंस्थानानि (अकाडमी) सन्ति । शताधिकसंस्कृतप्रचारपरिषदः कार्यं कुर्वन्ति । षष्ट्यधिकाः संस्कृत-पत्रिकाः प्रकाश्यन्ते । विश्वे पञ्चत्रिंशद्देशेषु त्रिशतपञ्चाशदधिक-विश्वविद्यालयेषु संस्कृतस्य पाठः भवति । शताधिकेषु वैज्ञानिकसंस्थानेषु संस्कृत-कम्प्यूटरविषयम् अधिकृत्य, संस्कृत-शास्त्र-विज्ञानविषयम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अधिकृत्य च शोधकार्यं प्रचलति । इण्टरनेट्मध्ये अपि संस्कृतभारत्याः होमपेज् अस्ति । अद्य विश्वे सर्वत्र वेदान्त-योग-आयुर्वेद-भगवद्गीता-ध्यान-ज्योतिष-भक्ति-प्रभृतिभारतीयविद्यानां प्रचारकारणतः तत्तद्विषयक-शिक्षार्थिनः मूलग्रन्थान् संस्कृतेन पठितुमिच्छन्ति इति कारणतः ते सर्वे संस्कृतस्य पठनम् आरब्धवन्तः सन्ति । लण्डन्नगरे सैण्ट् जेम्स् इण्डिपेण्डेण्ट् स्कूल् इत्यत्र तावत् प्रथमकक्ष्यातः एव संस्कृतमनिवार्यतया पाठ्यते । एतेन प्रकारेण संस्कृतस्य नवोत्थानस्य वार्तानाम् आवली दीर्घा एव अस्ति । अस्माभिः च्छात्राणां पुरतः समाजस्य पुरतः वा एतादृशवार्ताः श्रावणीयाः (न तु हासस्य वार्ताः)। एतेन जनानां मनस्सु उत्साहः जागर्ति । अग्रिमशताब्दः संस्कृतशताब्दः इति वायुमण्डलनिर्माणम् अस्माभिः करणीयम् । तदा जनाः सर्वे संस्कृतशिक्षणाय धावनस्य आरम्भं कुर्वन्ति ।

निर्वाचनकाले

इदानीं तु निर्वाचनकालः । राजनीतिज्ञाः तावत्, मतानां (votes) भाषामेव अवगच्छन्तीति जनाः वदन्ति (किन्तु सर्वे तादृशाः एव भवन्ति इति न) । 'संस्कृतहिताय कार्यं करोमि इति प्रतिज्ञां करोतु, भवतः भाषणेषु उद्घोषयतु च' इति अस्माभिः अभ्यर्थिनः मुखतः पत्रद्वारा वा प्रार्थनीयाः । प्रत्येकस्मिन् लोकसभानिर्वाचनक्षेत्रे सर्वेषां दलानां अभ्यर्थिनः अस्माभिः प्रार्थनीयाः । किञ्च, जयस्य अनन्तरं लोकसभायां संस्कृतेन शपथग्रहणं करणीयम् इत्यपि साग्रहं निवेदनीयम् । इदानीं सर्वे अभ्यर्थिनः प्रार्थनीयाः यतः परिणामघोषणानन्तरं ते न लभ्येरन् एव । परिणामघोषणानन्तरमपि जितवता सह मिलित्वा संस्कृतेन शपथस्वीकरणाय आग्रहः करणीयः; तद् तस्मै लिखित्वा दातव्यं च । तद् एवमस्ति – ''अहम्, ... लोकसभायाः सदस्यत्वेन निर्वाचितः निश्चयेन परमेश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने, यदहं विधिना स्थापितं भारतस्य संविधानं प्रति सत्यां, श्रद्धां, निष्ठां धारयिष्ये, भारतस्य प्रभुसत्तायाः अखण्डतायाश्च समर्थनं करिष्ये, तथा यत्पदं ग्रहीतुम् अहम्

CC-0. Nepal Sanskrit Academy Kathmandu Collection

उद्यतः अस्मि तस्य कर्तव्यानि श्रद्धापूर्वकं निर्वक्ष्यामि ।'' गतलोकसभायां ४६ सांसदाः संस्कृतेन शपथग्रहणं कृतवन्तः । तेषु भाजपदलीयाः ४३, शिवसेनायाः एकः, कांग्रेस्(ति)दलीयः एकः, कांग्रेस्दलीयः एकः च आसन् । १९९८ लोकसभानिर्वाचनावसरे केवलं भाजपादलस्य घोषणापत्रे संस्कृतशिक्षणस्य आग्रहः कृतः आसीत्, अन्यस्य कस्यचित् अपि दलस्य घोषणापत्रे संस्कृतोल्लेखः नासीत् ।

संस्कृतस्य संरक्षणसंवर्धनयोः उत्तरदायित्ववन्तः वयम् एव । संस्कृतज्ञानाम् अस्माकं युयुत्सुत्वं न परिसमाप्तम् । तात्कालिकाः परिभवाः अस्मान् पराङ्मुखान् कर्तुं न शक्नुयुः । लघु-लघु-कार्यैः महतः साधनार्थं वयं प्रतिदिनम्, अनवरतं, पुनः पुनः तानि एव कार्याणि दीर्घकालं यावत् कुर्वन्तः संस्कृताय समरं कर्तुं सिद्धाः । जित्वराः वयम् । चिकीर्षवः स्मः वयं राष्ट्रं विश्वगुरुं पुनः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चङ्क्रमणात् सङ्क्रमणम्

३

काचित् वैदेशिकी कथा एवम् अस्ति – कदाचित् वाक्, मौनम् – इति अनयोः मध्ये 'अहं श्रेयान्, अहं श्रेयान्' इति विवादः जातः । 'कः श्रेयान्' इति निर्णयः न जातः । अन्ते द्वाभ्यां भगवतः समीपं गतम् । भगवतः सम्मुखे प्रथमं मौनेन – 'मम अभावे जगति प्रतिक्षणं बहवः कलहाः भवेयुः' – इत्यादिरीत्या स्वीयः सुदीर्घः वादः प्रतिपादितः । मौनस्य भाषणस्य अनन्तरं वाचा अग्रे आगत्य उक्तं यद् 'मौनं स्वस्य श्रेष्ठताप्रतिपादनाय मम उपयोगं करोति, तेन एव प्रमाणितं भवति यत् मम एव महत्त्वम् अधिकम्' इति ।

एवमेव अद्य संस्कृतभाषायाः श्रेष्ठतां प्रतिपादयितुम् इतरभाषाणाम् आश्रयः क्रियते ! वास्तविकतया इतरभाषाणां द्वारा संस्कृतस्य महत्त्वकथनापेक्षया सरलसंस्कृतसम्भाषणमाध्यमेन यदि सम्भाषणं क्रियते, तर्हि तस्य श्रवणमात्रेणैव जनानां मनस्सु महान् प्रभावः भवति । रसगुल्लमिष्टान्नस्य मधुरसुगन्धादिविशेषाणां वर्णनपरभाषणापेक्षया कस्मैचित् रसगुल्ल एव दत्तं चेत् तस्य रसगुल्लसम्बन्धि अवगमनं स्पष्टं भवति । शब्दैः वर्णनेन मधुरस्य आस्वादानुभवः न भवति । खादितवतः तु मिष्टान्नस्य आस्वादानन्तरं तद्विषयकवर्णनपरशब्दानाम् आवश्यकता न भवति । तथा एव अद्य वयं संस्कृतसम्बन्धे इतरभाषाणां द्वारा भाषणापेक्षया, सरलतमेन संस्कृतेन एव भाषणं कुर्मः चेद् – तत् वाक्यम् एकमपि भवतु नाम – तेन एव महत् साधितं भविष्यति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावनिर्माणं करणीयम्

अन्यभाषाद्वारा 'संस्कृतभाषा सरला भाषा अस्ति' इत्यर्थेन कथनापेक्षया वयं सरलतमानि संस्कृतवाक्यानि श्रावयामः, यानि च श्रुत्वा अनधीतसंस्कृतः अपि श्रोता तस्य वाक्यस्य अर्थं भावार्थं वा अवगच्छेत् । तदा सः सहजतया संस्कृतस्य सरलत्वम् अनुभवति, अङ्गीकरोति च ।

अद्य संस्कृतविषये आदरवतां सङ्ख्या महती वर्तते । तथापि ते सर्वे संस्कृतपुनरुज्जीवनाय कार्यप्रवृत्ताः, कार्योत्सुकाः वा न सन्ति । तत्र प्रमुखं कारणम् इत्युक्ते - तेषां मनसि

१. संस्कृतं बहु कठिनम् ।

२. संस्कृतभाषा समाप्तप्राया; पुनः तस्याः उज्जीवनं न शक्यम् ।

३. संस्कृतम् अनिवार्यम्, आवश्यकमेव इति वा नास्ति, यतः संस्कृतेन विना अपि जीवनं शक्यम् ।

- इति एते त्रयः विचाराः दृढमूलाः सन्ति । अतः अस्माभिः जनमानसे संस्कृतविषये 'सरलं, साध्यम्, अनिवार्यम्' इति भावत्रयं निर्मातव्यम् ।

'सरलता' निरूपणम् एवम्

संस्कृतं 'सरलम्' इति भावस्य प्रचाराय सरलतमसंस्कृतेन सम्भाषणेन सह सभाकार्यक्रमादिषु संस्कृतेनापि कस्यचन कार्यक्रमस्य आयोजनम्, बालैः संस्कृतेन सम्भाषण-कथा-विनोदकणिकामहापुरुषवाक्यादि-प्रदर्शनम्, संस्कृतभाषया वीथीनाटक-(पथनाट्य-)अभिनयः, दूरदर्शन-केबल् टिवि-इत्यादिमाध्यमेन वर्तमान-आधुनिकविषयान् अधिकृत्य सरलसंस्कृतेन कार्यक्रमप्रसारणम्, संस्कृतपाठ्यपुस्तकानां परिवर्तनम्, विद्यालयेषु संस्कृतस्य संस्कृतमाध्यमेन पाठनम्, संस्कृतभाषया निमन्त्रणपत्राणां मुद्रणम्, संस्कृतव्यवहारवाक्यानां भित्तिपत्राणां च स्थापनम् - इत्येतादृशाः कार्यक्रमाः लाभाय भवेयुः ।

'साध्यता' निरूपणम् इत्थम्

'साध्यम्' इति भावनिर्माणाय एवम् अस्माकं वादम् उपस्थापयितुं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शक्नुमः – 'संस्कृतभाषायाः शिक्षणम् इत्युक्ते कस्याश्चित् नूतनभाषायाः शिक्षणम् इव न । यतः सर्वासु भारतीयभाषासु ५०% – ६०% शब्दाः संस्कृतशब्दाः, तद्भवशब्दाः वा। सर्वेषां भारतीयानां बाल्यकालतः संस्कृतस्य श्रवणसंस्कारः अस्ति । उत्तरप्रदेश-बिहार-मध्यप्रदेश-राजस्थान-देहली-हिमाचलप्रदेशेषु संस्कृतं प्राथमिकमाध्यमिकादिस्तरेषु अनिवार्यतया पाठ्यमानम् अस्ति, अन्येषु राज्येषु ऐच्छिकभाषारूपेण च अस्ति इति कारणतः भारतस्य शिक्षितजनेषु ३३% जनानां संस्कृतस्य पठनात्मकम् अवगमनात्मकं च ज्ञानम् अस्त्येव। (केवलं तद् प्रयोगात्मकम्, अभिव्यञ्जनात्मकं च करणीयम्) । संस्कृतभाषा प्रादेशिकभाषा न, अपि तु सार्वदेशिकी । संस्कृतस्य भारते कुत्रापि विरोधः नास्ति । परम्पराकारणतः अस्माकं रक्तस्य कणे कणे संस्कृतं निहितम् अस्ति । तद् बहिः आनेतव्यम् ।

अद्य देशे प्राथमिकस्तरतः स्नातकोत्तरस्तरपर्यन्तं संस्कृतं पठन्तः छात्राः त्रिकोटिमिताः सन्ति । यदि विद्यालयेषु संस्कृतस्य संस्कृतमाध्यमेन पाठनं भवेत् तर्हि एकवर्षाभ्यन्तरे त्रिकोटिच्छात्राः – तन्नाम भारतस्य जनसङ्ख्यायाः ३% जनाः – संस्कृतेन भाषणसमर्थाः भवेयुः ।

संस्कृतभाषाविषये जनहृदये यः अपारः अभिमानः अस्ति सः एव संस्कृतविकासाय प्रेरकशक्तिः भविष्यति । किञ्च संस्कृतभाषा स्वतः चैतन्यशीला, दैवी, शक्तिमती च – इति कारणतः सा स्वयमेव विकासं गच्छत्येव । आङ्ग्लभाषा तु विदेशीयभाषा इति भारतस्य स्वाभिमानिहृदयं तां न अङ्गीकरोति । हिन्दीभाषायाः तावत् दक्षिणभारते स्वीकारः जायमानः नास्ति । इतराः भाषाः प्रादेशिक्यः भवन्ति । अतः अन्ततो गत्वा नान्या गतिः इति कृत्वा संस्कृतमेव शरणं भविष्यति । संस्कृतभाषा तावत् परोक्षरूपेण अस्माकं सर्वेषाम् अन्तः अस्ति । पुनः तस्याः प्रकाशनमात्रम् अपेक्षितम् । गतशताधिकवर्षेभ्यः आङ्ग्लभाषाशिक्षणाय भारते यः प्रयत्नः कृतः तस्य दशसु एकभागस्य प्रयत्नेन संस्कृतस्य पुनरुज्जीवनं शक्यम्' इति एतेन प्रकारेण 'साध्यम' इति विषये अस्माभिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचारप्रचारः करणीयः । समाचारपत्रेषु, पत्रिकासु च एतद्विषये लेखनानि, वाचकविभागे पत्राणि च लेखनीयानि ।

'अनिवार्यता' निरूपणम् एतेन प्रकारेण

'राष्ट्रनवनिर्माणाय संस्कृतम् अनिवार्यम्' इति विषये तावत् कथं विषयस्य उपस्थापनं करणीयम् इति अस्माभिः इतोऽपि चिन्तनीयम् । प्रकृतं श्रूयमाणाः वादाः नीतिनिर्णायकानां ध्यानाकर्षकाः न सन्तीति, युवजनानाम् आकर्षकाः न सन्तीति च बहूनाम् अभिप्रायः ।

संस्कृताय देशव्यापि जनसमर्थनं प्राप्तव्यं चेत् तदर्थं जीवनस्य विविधक्षेत्रेषु प्रमुखाः - विचारनेतारः (Opinion leaders) इति कथ्यमानाः - अस्माभिः ग्रहीतव्याः । तेषु विचारनेतृषु अद्यत्वे समूहमाध्यम (Media) प्रमुखाः, उन्नतशासकीय-अधिकारिणः, शिक्षाविदः, वाणिज्य-उद्योगप्रमुखाः, राजनीतिज्ञाः, विज्ञान-तन्त्रज्ञानक्षेत्रप्रमुखाः, प्रबन्धशास्त्र-तज्ज्ञाः च सर्वाधिकं प्रामुख्यम् आवहन्ति । अतः अस्माभिः स्थाने स्थाने ते उपसर्पणीयाः, सम्पर्कितव्याः, सम्भाषणशिबिरदर्शनाय आनेतव्याः च । बहु समर्थनपरकार्यं (lobbying) करणीयम् । एतेषां समर्थनेन संस्कृतं बहु शीघ्रं वृद्धिं गच्छेत् । शक्तिशालि 'संस्कृतलॉबि' निर्मातव्यं चेत् अस्माभिः देशे सर्वत्र प्रतिस्थानं तत्रत्याः समाजप्रमुखाः सम्पर्कितव्याः तेषां मनोनयनं च करणीयम् । महदिदं कार्यम् । एतदर्थं विशिष्टः प्रयासः एव विधातव्यः ।

भाषाशिक्षणाय एव अवधानम्

यद्यपि संस्कृतशिक्षणं नाम तत्र भाषाशिक्षणं, साहित्यशिक्षणं, शास्त्रशिक्षणं, वेदशिक्षणम् चेति चत्वारः भागाः सन्ति, तथापि अस्माभिः सम्पन्मूलसङ्ग्रहं कुर्वद्भिः सोपानक्रमेण एकैकं कार्यं साधनीयं भवति । अस्माभिः सर्वैः अग्रिमवर्षद्वये भाषाशिक्षणाय एव अधिकम् अवधानं दातव्यम् । भाषाशिक्षणं च पञ्चभिः उपायैः साधनीयम् -

१. सम्भाषणशिबिराणि, भाषाबोधनवर्गाः, बालकेन्द्राणि - इत्यादीनि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२. पुस्तकानि, ध्वनिमुद्रिकाः, वीडियो, सि.डि.राम् (C.D-ROM) - इत्यादीनि ।
३. पत्राचारद्वारा शिक्षणम्, TVद्वारा, इण्टरनेट्द्वारा वा शिक्षणम् ।
४. सरलसंस्कृतपरीक्षाः, संस्कृतपत्रिकाः, सन्ध्याकालिकसंस्कृत-विद्यालयाः कक्ष्याः वा ।
५. औपचारिकसंस्कृत-शिक्षणव्यवस्थायां (प्राथमिक-माध्यमिक-महाविद्यालय-पाठशाला-संस्कृतविश्वविद्यालयेषु) संस्कृतशिक्षा-विधेः पाठ्यक्रमस्य च प्रभावीकरणम् ।

विविधाः पाठ्यक्रमाः

जनानां वेदान्तादिविविधविषयेषु रुचिः भवति । तत्तद्विषयाणां मूलग्रन्थान् पठितुं ते संस्कृताभ्यासं कर्तुम् इच्छन्ति । अतः तदनुसारम् अस्माकं समीपे पाठ्यक्रमाः भवेयुः। वेदान्ते रुचिमते अस्माभिः वेदान्तविषयवस्तुयुक्त-पाठ्यक्रमद्वारा संस्कृतं पाठनीयम् । आयुर्वेदद्वारा संस्कृतम्, योगद्वारा संस्कृतम्, गीताद्वारा संस्कृतम्, रामायणद्वारा संस्कृतम्, स्तोत्राणां द्वारा संस्कृतम्, भरतनाट्याय संस्कृतम्, अर्थशास्त्राय संस्कृतम्, विज्ञानाय संस्कृतम्, ज्योतिष्याय संस्कृतम् - इत्येवंविधानि पाठनतन्त्राणि चिन्तनीयानि । एतादृशशिक्षणक्रमः बहु विशिष्टः भवेत् ।

भवेत् विज्ञान-संस्कृतयोः सङ्गमः

सद्यः देहल्यां संस्कृतभारत्याः आश्रये केषाञ्चित् गण्यानां विचारनेतॄणां काचित् गोष्ठी आयोजिता आसीत्, यत्र च देशे संस्कृतस्य पुनरुज्जीवनाय कार्यतन्त्राणि चर्चितानि । तत्र कश्चन वरिष्ठः उक्तवान् - ''संस्कृतस्य 'विक्रयणं' (Selling and pushing) न आवश्यकं, यतः संस्कृतं स्वयमेव पुनः प्रतिष्ठापितं भविष्यति । अद्य अस्माकं कर्तव्यं तु संस्कृतवाङ्मये निहितं ज्ञानं (तन्नाम वैज्ञानिकविषयाः) बहिरानेतव्यं, प्रकाशनीयं च । तदा सर्वे स्वयमेव संस्कृतं पठिष्यन्ति'' इति ।

तस्य कथनमपि सत्यमेव । अतः अस्माभिः तादृशशोधकार्याणि अपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वीकरणीयानि । तदर्थं स्थाने स्थाने संस्कृतज्ञः + वैज्ञानिकाः – इति द्वयोः द्वित्राणां वा गणाः चिन्तनीयाः । एकैकः गणः एकैकविषयं निश्चित्य तद्विषये चिन्तनस्य, अध्ययनस्य, गवेषणस्य च आरम्भं कुर्यात् । अथवा एकः संस्कृतज्ञः, पुनः केचन विविधविज्ञानविषयज्ञाः च सम्भूय कस्यचित् संस्कृतग्रन्थस्य अध्ययनं कुर्युः । एतादृशगणरचनायै इतरेषां प्रतीक्षा करणीया नास्ति । तत्र तत्र वयं स्वयमेव गणरचनां कृत्वा कार्यारम्भं कर्तुं शक्नुमः । (यदि भवन्तः एवं कार्यारम्भं कुर्वन्ति तर्हि कस्मिन् विषये शोधं कुर्वन्तीति संस्कृतभारतीकार्यालयं सूचयन्तु ।) संस्कृते कतिचन लक्षग्रन्थाः सन्ति । देशे सर्वे संस्कृतज्ञाः कार्यप्रवृत्ताः भवन्ति चेदेव तेषां सर्वेषाम् अध्ययनं साध्यं भवेत् ।

अपि च प्राचीन-अर्वाचीनयोः, पुरातन-आधुनिकयोः, पूर्वपश्चिमयोः च विचाराणां सङ्गमनाय संस्कृतज्ञाः विज्ञानसम्बन्धे, वर्तमानविषयाणां सम्बन्धे च अध्ययनस्य आरम्भं कुर्युः । आधुनिकविषयज्ञाः वैज्ञानिकाः च संस्कृताभ्यासं कुर्युः । संस्कृतविद्यालयेषु आधुनिकविषयाणां भाषणकार्यक्रमाः आयोजनीयाः, सङ्गणक-(Computer) शिक्षणव्यवस्था करणीया च । विज्ञानच्छात्रेभ्यः संस्कृतसम्भाषणशिबिराणि करणीयानि । तान्त्रिकमहाविद्यालयेषु, वैज्ञानिकसंस्थानेषु, IIT, IIM – इत्यादिसंस्थासु च प्रबन्धशास्त्र -(Management) च्छात्राणां कृते सम्भाषणशिबिराणि चालनीयानि । केषुचित् महाविद्यालयेषु उभयविषयशिक्षणव्यवस्थायै प्रयत्नाः करणीयाः । सेवानिवृत्तानां संस्कृतशिक्षक-प्राध्यापकादीनां शक्तिः एतादृशगवेषणकार्ये यदि विनियुक्ता भवति तर्हि महते लाभाय भवेत् । १९८६तमे वर्षे 'संस्कृतं + सङ्गणकम्' इत्येषः विषयः प्रसिद्धः जातः इति कारणतः देशे संस्कृतक्षेत्रे नवं चैतन्यं निर्मितम् अभवत् । एवमेव संस्कृतविज्ञानयोः सम्बन्धस्थापनेन पुनः चैतन्यनिर्माणं भवेत् ।

मुद्रणमाध्यमस्य उपयोगः

प्रादेशिकभाषापत्रिकाः, आङ्ग्लभाषापत्रिकाः वार्तापत्राणि च देशे असङ्ख्यानि सन्ति । तासु अधिकाः [illegible] लघुपत्रिकाः । तासां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वासां लेखनानाम् अभावः भवति । संस्कृतविषयकलेखनानि लिखित्वा लेखयित्वा वा अस्माभिः दातव्यानि । ते अवश्यमेव तानि प्रकाशयन्ति । 'अन्यानि अपि ददातु' इति पुनः पुनः अस्मान् पृच्छन्ति च । सम्पादकेन सह वार्तालापः क्रियते चेत् सः स्वपत्रिकायां सरल-संस्कृतस्तम्भस्य (प्रादेशिकलिप्या संस्कृतभाषया च सम्भाषण-कथा-विनोदकणिका-वार्ताव्यवहारवाक्य-प्रेरकप्रसङ्गेत्यादयः) प्रकाशनाय अनुमतिं दद्यात् । 'वाचकवाणी', पाठकपीठम्, प्रतिस्पन्दः - इत्यादिविभागे संस्कृतपरतया पत्राणि सर्वदा प्रकाशितानि भवेयुः । एवं मुद्रणमाध्यमस्य (Print Media इत्यस्य) पूर्णः उपयोगः स्वीकरणीयः । संस्कृतं सर्वदा जनानां दृष्टिपथे श्रवणपथे च भवेत् । क्रमशः अस्माभिः संस्कृतसम्बन्धे राष्ट्रिय-परिचर्चा (National Debate) स्रष्टव्या ।

संस्थादीनां सम्पर्कः

संस्कृतानुरागिणः संस्थाः, जनाः च अगणिताः सन्ति । परं तेषु एकसूत्रता नास्ति । अतः तेषां सर्वेषां कृते संस्कृतभारत्याः परिचयः कारणीयः । परस्परं सम्बन्धः कल्पनीयः च । साक्षात् मेलनेन कार्यक्रमद्वारा, साहित्यद्वारा, पत्रव्यवहारद्वारा च सर्वेषां परस्परसम्पर्कजाल (Net Working) स्थापनीयम् । संस्कृतभारती मूलसूत्रं भवितुम् अर्हति 'सम्भाषणसन्देशः' विचारवाहकः भवेत् । तदर्थं सर्वे जनाः, संस्थाः च सम्भाषणसन्देशस्य ग्राहकाः यथा भवेयुः तथा अस्माभिः विशेषप्रयत्न करणीयः । वस्तुतः सम्भाषणसन्देशः तावत् अस्माकं सर्वेषां कृते प्रेरणायाः अन्यतमं स्रोतः ।

अद्यत्वे तन्त्रज्ञानं (Technology) प्रतिदिनं नवतां प्राप्नोति । यदि वय तेन सह न गच्छामः तर्हि अस्माकम् अस्तित्वमेव नष्टं भवेत् । टेलिविजन् इण्टरनेट्, डिजिटल्टेक्नालजि - इत्यादीनाम् उपयोगः अस्माभिः संस्कृत शिक्षणे प्रचारे च करणीयः । तेन अल्पेन कालेन वयम् अधिकान् जना प्राप्तुं शक्नुयाम । किञ्च 'संस्कृतं पुरातनम्' इति चित्रम् (Brand Imag

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति कथ्यमानम्) अपि परिवर्तितं सत् 'तत् आधुनिकम्' इति जनैः अङ्गीकृतं भवेत् ।

'बलम् उपास्व'

कस्यापि कार्यविस्तारस्य अंशद्वयं भवति, प्रभावनिर्माणं शक्तिनिर्माणम् चेति । प्रभाव-शक्त्योः मध्ये भेदः अस्ति । इदम् अत्र उदाहरणम् - १९४७तमवर्षतः पूर्वं गान्धिविचारधारा एतावती प्रबला आसीत् यत्, तदर्थं लक्षशः जनाः स्ववृत्तिं (कार्यं) त्यक्तवन्तः, विद्याभ्यासं परित्यक्तवन्तः, सम्पत्तिं समर्पितवन्तः, कारागृहं गतवन्तः, प्राणान् अपि दत्तवन्तः । परन्तु अद्य गान्धिविचारधारायै कः त्यागं कर्तुं सिद्धः अस्ति ? (विचारधारां त्यक्तुं सिद्धः अस्ति !) तथा सति गान्धिविचारधारा अद्य नास्ति किम् ? अस्ति, विचारधारायाः प्रभावः अस्ति । पूर्ववत् शक्तिरूपेण नास्ति । एषः एव भेदः ।

अद्य संस्कृतस्य प्रभावः अस्ति । परन्तु संस्कृतं शक्तिरूपेण नास्ति । तदर्थम् अस्माभिः शक्तिनिर्माणं करणीयम् । जनेषु संस्कृतविषये आदरः अधिकः जातः चेत्, संस्कृताध्ययनस्य उत्साहः प्रवृद्धः चेत्, संस्कृतानुरागिणां संख्या अधिका जाता चेत्, 'संस्कतं सरलं, सम्भाषण-योग्यम्, तत् अवश्यं पठनीयम्' - इत्यादि-सद्भावनिर्माणं जातं चेत् 'संस्कृतस्य प्रभावः अधिकः जातः' इत्यर्थः । तावता केवलेन संस्कृतस्य विकासः न भविष्यति । निर्मितस्य सद्भावस्य लाभस्वीकाराय, संस्कृतानुरागिणं संस्कृतशिक्षार्थित्वेन परिवर्तयितुं, संस्कतज्ञं संस्कृतकार्यकर्तारं कर्तुं, शिक्षणव्यवस्थां कर्तुं, शिक्षणसाहित्यं प्रकाशयितुं, संस्कृतसम्भाषणं जनान्दोलनं कर्तुं च शक्तिः आवश्यकी भवति । 'सा कुतः लभ्यते ?' इत्यस्य उत्तरं - 'बलमुपास्व' ।

भाषणैः, लेखनैः, वीथीनाटकैः, दूरदर्शन-आकाशवाणीकार्यक्रमैः, प्रदर्शिनीभिः, भित्तिपत्रैः, शुभाशयपत्रैः, सम्मेलनैः, बहुविधैः प्रचार-तन्त्रैः, महाकार्यक्रमैः च प्रभावनिर्माणं भवति, न तु शक्तिनिर्माणम् । शक्तिनिर्माणं तावत् सङ्घनिर्माणेन भवति । संस्कृतस्य [illegible]शिक्षणेन,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

शिक्षकप्रशिक्षणेन, कार्यकर्तृप्रशिक्षणेन, कार्यचिन्तनाय नियमितरूपेण उपवेशनेन, परस्पर-अनौपचारिक-स्नेहसंवादेन, कार्ययोजनया, समयदानेन, कार्यार्थं प्रवासेन, धनादिसाधनानां सङ्ग्रहेण, कार्यकर्तृनिर्माणेन, तेषां वर्धनेन च सङ्घटनशक्तिनिर्माणं भवति । अतः अस्माभिः प्रभाववर्धनमात्रं न, अपि तु शक्तिवर्धनमपि (शक्तिवर्धनमेव वा) चिन्तनीयम् ।

'त्रिभाषासूत्रे संस्कृतस्य स्थानं भवेत्' - इति विचारः उत्तमः । परन्तु विचारस्य पृष्ठतः शक्तिः नास्ति चेत् के तं विचारं स्वीकुर्वन्ति ? शास्त्ररक्षणं करणीयम्, वेदशिक्षणं करणीयम्, नवसाहित्यनिर्माणं करणीयम् - सर्वमपि करणीयमेव । (कल्पनानाम् अभावः दारिद्र्यं वा नास्ति भारते !) परन्तु कर्तारः के ? अतः अस्माभिः तेषां कर्तॄणां निर्माणं सर्वप्रथमं करणीयम् । ध्येयवादिनां, समर्पितचित्तानां, परिश्रमशीलानां च कार्यकर्तॄणां देशव्यापी, विशालः च एकः गणः अस्माभिः निर्मितः चेत् पश्चात् तस्य गणस्य शक्तेः आधारेण वयं महतः उपक्रमान् स्वीकर्तुं शक्ष्यामः । अतः वयं सर्वे कार्यकर्तारः भवेम, अस्मादृशानां कार्यकर्तॄणां निर्माणं कुर्याम च । अस्माकं गतिशीलतायाः द्वारा संस्कृतक्षेत्रे गतिशीलताम् आनयेम । संस्कृतार्थम् अकुण्ठितसक्रियता अस्माकं जीवनशैली भवेत् ।

देशे वयं संस्कृतशिक्षकाः पञ्चलक्षाधिकाः स्मः । तथा च संस्कृतप्रधानविषयच्छात्राः अपि एकलक्षाधिकाः स्मः । अस्माकं संख्या न्यूना नैव । वयं सङ्कल्पं कुर्मः चेत् बहु किमपि साधयितुं शक्नुयाम ।

शिक्षणीयं सम्भाषणम्

कस्यचित् सर्वेक्षणस्य अनुसारं भारते संस्कृतविषये ७५% जनाः अज्ञाः, २२% जनाः संस्कृतानुरागिणः, तथा च ३% जनाः संस्कृतविषये पूर्वाग्रह-पीडिताः । अस्माकं प्रथमलक्ष्यं २२% जनानां संस्कृतशिक्षणम्, पश्चात् वयं ७५% जनान् पाठयेम । तावति काले अवशिष्टाः ३% जनाः अपि परिवर्तिताः भवेयुः, संस्कृतस्य नवप्रवाहेण प्रक्षालिताः वा भवेयुः ! अतः अद्य अस्माकं कर्तव्यम् अविरतरूपेण जनानां संस्कृतसम्भाषणशिक्षणम् । तावतां जनानां शिक्षणाय एकैकेन अपि कार्यतत्परेण भवितव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

संस्कृतभारत्या सद्यः एव 'वदतु संस्कृतम्' इति शीर्षकेण बहु वर्णयुतानि चत्वारि भित्तिपत्राणि प्रकाशितानि । भित्तिपत्राणां विषयवस्तु, अर्थपूर्णं विन्यासम्, आकर्षकं मुद्रणं च दृष्ट्वा जनाः शतशः सहस्रशः संख्यया तेषां क्रयणं कुर्वन्तः सन्ति । (चतुर्णां प्रतिगुच्छं रू. २०/- + पत्राचारव्ययः) तानि भित्तिपत्राणि गृहे, कार्यालये, विद्यालये, विविधसंस्थासु च स्थापयितुं शक्यन्ते । कश्चन प्रबन्धपरामर्शदाता भित्तिपत्राणां गुणवत्तां (Quality) दृष्ट्वा उक्तवान् - ''संस्कृतस्य कीदृशं चित्रं जनमानसे निर्मातव्यम् इत्यस्य प्रतीकरूपेण एतानि सन्ति । लक्षशः संख्यया एतेषां वितरणं भवेत्'' इति ।

बहुभ्यः वर्षेभ्यः वयं कार्यं कुर्वन्तः स्मः । चङ्क्रमणं कुर्वन्तः स्मः । एतस्याः स्थितितः यथा शीघ्रातिशीघ्रं समग्रसमाजे 'सङ्क्रमणं' भवति तथा अस्माभिः कार्यतन्त्राणि, कार्ययोजना, कार्यक्रमाः च चिन्तनीयाः । लक्ष्यानुसारं प्रबलं कार्यकर्तृसङ्घटनं घटनीयम् । अस्माकं सर्वेषां परिश्रमेण, प्रयत्नेन च वयं संस्कृताय महदेकं जनान्दोलनम् उपस्थापयाम ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४

संस्कृतगृहम्

पञ्चदशवर्षेभ्यः पूर्वं जाता घटना एषा । चेन्नैनगरस्य कश्चन वयोवृद्धः सामाजिककार्यकर्ता, यः तावद् जीवनं सर्वं समाजसेवायां यापितवान्, तादृशः सः श्रुतवान् यत् बेङ्गलूरुनगरे कस्मिंश्चित् गृहे संस्कृतभाषया नित्यव्यवहारः भवति इति । अतः सः तद् द्रष्टुं बेङ्गलूरु आगतवान् । तद् गृहं गतवान् ।

तस्मिन् गृहे संस्कृतज्ञौ मातापितरौ, पुत्रः पुत्री च । हिन्दुसेवा प्रतिष्ठानस्य संस्कृतविभागेन प्रेरितौ तौ मातापितरौ गृहे परस्परं, सुताभ्यां सह च संस्कृतेन वार्तालापं कुरुतः स्म, मासत्रयतः । परिणामतः न केवलं बालद्वयम्, अपि तु प्रातिवेशिकाः बालाः, ये बालाः एतद् गृहं क्रीडार्थम् आगच्छन्ति स्म ते सर्वे अपि, संस्कृतेन धाराप्रवाहरूपेण सम्भाषणं कुर्वन्ति स्म । परितः सर्वत्र संस्कृतसुगन्धः प्रसृतः आसीत् ।

चेन्नैतः आगतः ज्येष्ठः तस्मिन् गृहे कतिचन घण्टाः यावत् स्थितवान्, दृष्टवान् च यत् बालाः भाषन्ते स्म संस्कृतेन, हसन्ति स्म संस्कृतेन, क्रीडन्ति स्म संस्कृतेन, कलहमपि कुर्वन्ति स्म संस्कृतेन ! पश्चात् तस्मात् गृहात् प्रतिनिवर्तमानस्य तस्य ज्येष्ठस्य नेत्राभ्याम् अश्रूणि प्रवहन्ति स्म । पार्श्वे विद्यमानेन कार्यकर्त्रा पृष्टं – ''किं जातम् ?'' इति । सः उक्तवान् – ''मया अपि मम बाल्ये एतादृशं संस्कृतशिक्षणं, एतादृशः संस्कारः च प्राप्तव्यः आसीत् !''

संस्कृतसम्भाषण-आन्दोलनस्य 'संस्कृतगृहम्' इति योजनायाः आरम्भगृहेषु तद् गृहम् अन्यतमं गृहम् । 'संस्कृतेन यदि जनभाषया भवितव्यं तर्हि प्रथमं तया गृहभाषया भवितव्यम्' इति विचारः आरब्धः आसीत् आन्दोलनकार्यकर्तृषु । यतः प्रथमं तावद् जनाः जानीयुः यद् 'संस्कृतभाषा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गृहे व्यवहारयोग्या, संस्कृतभाषायाः द्वारा दिनस्य चतुर्विंशतिघण्टाः अपि जीवनं कर्तुं शक्यते' इति । एकस्मिन् गृहे यदि निरन्तरं संस्कृतव्यवहारः भवति तर्हि तद् गृहं परितः स्थितेषु गृहेषु तथा च तेषां बन्धुमित्रवर्गस्य शताधिकगृहेषु तस्य प्रभावः भवति ।

संस्कृतं गृहे किमर्थम् ?

गृहे तावद् पारम्परिकरूपेण कस्याश्चित् भाषायाः प्रयोगः भवति । सा भाषा परम्परया मातृभाषा भवति । यदि संस्कृतभाषां गृहभाषां कृत्वा गृह-वंश-परम्परया सह तां योजयामः तर्हि संस्कृतभाषा अनूचानरूपेण जीवति । गृहे यदि मातापितरौ संस्कृतेन व्यवहारं कुरुतः तर्हि बालानाम् आयासेन विना, श्रमेण विना, काठिन्येन विना च संस्कृतभाषाज्ञानं भवति - एते एव विचाराः आसन् 'संस्कृतगृह'-योजनायाः आरम्भसमये, कार्यकर्तृणां मनसि ।

भाषायाः पूर्णरूपेण अभ्यासः करणीयः चेत् गृहे संस्कृतेन व्यवहारः करणीयः । कस्याश्चित् भाषायाः द्वारा सामान्यवार्तालापसामर्थ्यसम्पादनं तस्याः भाषायाः अभ्यासस्य प्रथमं सोपानम् । विचारप्रकटनसामर्थ्यं द्वितीयं सोपानम् । भावाभिव्यक्तिसामर्थ्यं तावद् अन्तिमं सोपानम् । गृहे सर्वस्य अपि जनस्य मनसि सन्तोष-कोप-दुःखादिसर्वविधभावानां निर्माणं भवति । तेषु तेषु प्रसङ्गेषु संस्कृतेन व्यवहारकरणेन सूक्ष्मातिसूक्ष्मभावानां प्रकटनस्य अभ्यासः भवति । अतः संस्कृतभाषायाः अभ्यासस्य प्रशस्ततमं स्थानं गृहमेव ।

यावत्पर्यन्तं महिलाः - विशिष्य गृहिण्यः - संस्कृतभाषया न वदन्ति तावत् पर्यन्तं संस्कृतभाषा जनभाषा न भवेत् । १९८१तमे वर्षे यदा संस्कृत-सम्भाषण-आन्दोलनस्य आरम्भः अभवत्, तदा ज्येष्ठैः उक्तम् आसीत् यत् कश्चन पूर्णकालिकः कार्यकर्ता सम्भाषणशिबिरचालनाय यत्र कुत्रापि गच्छेत् नाम, तेन प्रतिस्थानं त्रीणि शिबिराणि चालनीयानि । तत्र प्रातःकाले 'सेवाबस्ति', 'दलितबस्ती', 'उपेक्षितबस्ती', 'हरिजनकालोनि' - इत्यादिरूपेण कथ्यमानेषु स्थानेषु ये संस्कृतशिक्षणतः,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सांस्कृतिकसंस्कारेभ्यः वा वञ्चिताः सन्ति तेषां तत्रत्यबन्धूनां कृते, अपराह्णकाले मातॄणां कृते, सायङ्काले सर्वेषां कृते च शिबिरं भवेत् । प्रातःकालिक - शिबिरेण सामाजिकसमरसता भवति । सायङ्कालिकशिबिरेण युवकार्यकर्तारः लभ्यन्ते । मातॄणां शिबिरस्य फलं तावत् संस्कृत- कुटुम्बनिर्माणम् । यतः यदि एका माता संस्कृतज्ञा भवति तर्हि कुटुम्बं संस्कृतकुटुम्बं भविष्यति, संस्कृतकार्याणाम् आश्रयस्थानं च भविष्यति इति ।

स्वरूपं संस्कृतगृहस्य

संस्कृतगृहम् इत्युक्ते तत्र दिनस्य चतुर्विंशतिः घण्टाः अपि संस्कृतेन एव व्यवहारः करणीयः इति अर्थः न । तथा कर्तुं शक्नुवन्ति चेत् महती सेवा सा । तानि गृहाणि धन्यानि ! तेषां गृहाणाम् उल्लेखः इतिहासे भवेदेव ! परन्तु अद्यतनस्थितौ सर्वेभ्यः तादृशीम् अपेक्षां कर्तुं न शक्नुयाम । यस्मिन् गृहे एकः, द्वौ वा संस्कृतेन सम्भाषणं कुरुतः, अन्ये च संस्कृतेन उक्तम् अवगन्तुं शक्नुवन्ति, प्रयतन्ते वा; सर्वे संस्कृतानुकूलाः, अभ्यासम् आरब्धवन्तः वा, दिने कञ्चित्कालं संस्कृतवार्तालापं कुर्वन्ति, तद् गृहं गच्छामः चेत् संस्कृतं श्रुतिपथम्, दृष्टिपथं वा आगच्छति – तादृशं गृहं वयं 'संस्कृतगृहम्' इति वदामः ।

भवतु प्रबला इच्छा

सर्वः अपि संस्कृतज्ञः - शिक्षकः अथवा शिक्षिका - प्रथमं स्वगृहं संस्कृतगृहं कुर्यात् । परन्तु तदर्थं प्रबला इच्छाशक्तिः अपेक्षिता । पूर्वं कश्चन संस्कृतशिक्षकः अस्माभिः प्रार्थितः आसीत् यत् ''स्वगृहं संस्कृतगृहं करोतु'' इति । तदा तेन उक्तं - ''मम समयः नास्ति'' ।

तन्नाम गृहे सर्वेषां संस्कृतपाठनाय समयः नास्ति इति अर्थः । तस्य आशयः आसीत् यत् संस्कृतपाठनाय गृहसदस्याः सर्वे निश्चितसमये पुस्तकं गृहीत्वा पाठश्रवणाय उपविशेयुः इति । वस्तुतः तदर्थं पुस्तकपाठनस्य आवश्यकता नास्ति । सः गृहे यद् यद् सम्भाषणं करोति तदेव संस्कृतेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

करोतु । तावता एव इष्टसिद्धिः भविष्यति । 'अत्र आगच्छतु', 'जलं ददातु', 'मास्तु', 'पर्याप्तम्' - इत्यादीनि वाक्यानि, शब्दान् वा को वा अनधीतसंस्कृतः अपि न जानीयात् ? साभिनयं मन्दं च वदतु, सर्वे अवगच्छन्ति । क्रमशः इतरे गृहसदस्याः अपि सम्भाषणस्य आरम्भं कुर्वन्ति । अतः तस्य शिक्षकस्य संस्कृतगृहनिमित्तं प्रयत्न-अकरणस्य वास्तविकं कारणं समयस्य अभावः न आसीत्, अपि तु आसीत् इच्छायाः अभावः !

संस्कृतगृहं कर्तुम् उपायाः

स्वगृहं संस्कृतगृहं कर्तुं बहवः उपायाः सन्ति । गृहे सर्वेषां वस्तूनाम् उपरि संस्कृतनाम लिखित्वा स्थापनम्, दैनन्दिनव्यवहारोपयोगिनां वाक्यानां भित्तिपत्ररूपेण लिखित्वा स्थापनम् - इति एतेन उपायद्वयेन गृहसदस्यानां सर्वेषामपि स्वल्पैः दिनैः एव तेषां शब्दानां वाक्यानां च अभ्यासः भवति, विना श्रमेण । दिने कश्चन समयः निश्चेतव्यः । यथा - सायङ्काले भोजनसमयः, भोजनोत्तरसमयः वा, प्रातः सप्तवादनतः अष्टवादन-पर्यन्तम् - इत्येवम् । तस्मिन् निश्चिते समये संस्कृतेन सम्भाषणाय प्रयत्नः करणीयः । क्रमशः तस्य अवधेः विस्तारणं च करणीयम् । संस्कृतभारत्या प्रकाशितपुस्तकानि, व्यावहारिकशब्दकोषाः च गृहे भवन्ति चेत् प्रतिदिनं तानि दृष्ट्वा अभ्यासं कर्तुं शक्यते । गृहजनाः सर्वे अपि मिलित्वा सम्भाषणशिबिरं गच्छन्ति चेत्, अथवा न्यूनातिन्यूनं दम्पती गच्छतः चेत् अनन्तरं गृहे संस्कृतवार्तालापाय आनुकूल्यं कल्पितं भवेत् ।

कश्चन संस्कृतज्ञः व्याकरणविद्वान् स्वपुत्रद्वयं संस्कृतं बोधयितुं कञ्चित् विनूतनं प्रयत्नं कृतवान् आसीत् । सः प्रतिदिनं प्रातः भ्रमणाय गमनसमये पुत्रद्वयं नयति स्म । मार्गे वार्तालापद्वारा, प्रश्नोत्तरद्वारा, वर्णनद्वारा, बालयोः जिज्ञासोत्पादनद्वारा च संस्कृतसम्भाषणं पाठितवान् । अन्येऽपि बहवः कार्यकर्तारः एतद्विषये नानाविधान् प्रयोगान् कृतवन्तः, कुर्वन्तश्च सन्ति । कश्चन पूर्णकालिकः कार्यकर्ता संस्कृताभिमानिनः कस्यचित् गृहं सप्ताहे द्विवारम् अल्पाहारनिमित्तेन गच्छन्, अल्पाहारभक्षणसमये सर्वेषां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतसम्भाषणपाठं कृत्वा मासत्रये तद् गृहं संस्कृतगृहं कृतवान् ।

काचित् माता क्रीडानां द्वारा स्वसुतान् संस्कृतं पाठितवती । अपरा काचित् गृहिणी स्वसुतयोः संस्कृतशिक्षणाय परितः स्थितानां गृहाणां बालान् अपि सायं स्वगृहम् आहूय संस्कृतबालकेन्द्रं चालितवती ।

अन्या काचित् माता स्वपुत्रं संस्कृतं पाठयितुं प्रतिदिनं विनूतनम् उपायम् आविष्करोति स्म । सा प्रातः उत्थान-अनन्तरं पुत्राय दुग्धम् उष्णीकृत्य चुल्लिकायाः पुरतः संस्थाय, गत्वा पुत्रम् उत्थाप्य वदति स्म - ''दुग्धं चुल्लिकायाः 'पुरतः' अस्ति, स्वीकरोतु ।'' सः गत्वा स्वीकरोति, 'पुरतः' शब्दस्य अर्थं जानाति । दिनत्रयानन्तरं सा दुग्धं वामतः स्थापयति, पुनः दक्षिणतः स्थापयति । अन्यस्मिन् दिने दुग्धं वामतः स्थापयित्वा 'दक्षिणतः' अस्तीति उक्तवती । तदा पुत्रः एव उक्तवान् - ''अम्ब, 'दक्षिणतः' नास्ति, 'वामतः' अस्ति'' इति । एतादृशान् बहून् प्रयोगान् वयमपि कर्तुं शक्नुयाम एव ।

गृहे यद् यद् कार्यं क्रियते तद् कुर्वद्भिः तत्सम्बन्धि वाक्यं वक्तव्यम् । यथा 'स्थालिकां स्थापयामि' इति वदन्ती माता स्थालिकां स्थापयेत् । तदा ध्वनिदृश्ययोः सम्बन्धं कल्पयित्वा पुत्रः, पुत्री, पतिः वा शब्दार्थं वाक्यार्थं वा अवगच्छन्ति । संस्कृतभारत्या 'सम्भाषणसंस्कृतम्' 'हितोपदेशकथाः' इत्यादयः ध्वनिमुद्रिकाः प्रकाशिताः सन्ति । ताः ध्वनिमुद्रिकाः अथवा द्वित्राणां संस्कृतज्ञानां द्वारा संस्कृतेन कृतस्य सम्भाषणस्य, भाषणस्य, उक्तानां कथानां वा सामान्यरूपेण ध्वनिमुद्रणं कृत्वा ताः संस्कृतध्वनिमुद्रिकाः वा गृहे सर्वदा श्रोतव्याः । तेन कश्चन भाषासंस्कारः (Language Exposure) भवति ।

'प्रतिदिनम् एकस्य नूतनवाक्यस्य शिक्षणम्' इति पद्धतिम् अपि आरब्धुं शक्यते । सप्ताहे एकं दिनं निश्चित्य तस्मिन् दिने सर्वैः संस्कृतेन एव सम्भाषणं करणीयम् इति निश्चयकरणम् अपि उचितम् एव । दूरभाषया अपि संस्कृतेन वार्तालापः करणीयः । दूरभाषासम्पर्कसमये यदि अशुद्धसंख्या (Wrong Number) भवति तर्हि अवश्यमेव संस्कृतेन वदतु !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतपरिवाराणां तदा तदा मेलनं भवेत् । संस्कृतपरिवारजनाः परस्परगृहगमनागमनं कुर्युः । तेन तेषाम् अनुभवानां विनिमयः भवति, प्रेरणा कल्पनाः च वर्धन्ते । ये तावद् स्वगृहं संस्कृतगृहं कर्तुं प्रयतमानाः सन्ति ते स्वगृहस्य पुरतः 'संस्कृतगृहम्' इति संश्लेषकं, फलकं वा स्थापयन्तु, येन संस्कृतस्य कश्चन प्रचारलाभः भवेत् ।

अनानुकूल्ये सति...

यद्यपि केचन स्वगृहं पूर्णतया संस्कृतगृहं कर्तुम् इच्छन्ति, तथापि वृद्धौ मातापितरौ, श्वशुरौ वा, अन्यः कोऽपि अननुकूलः गृहसदस्यः अस्ति इति कारणतः कष्टम् अनुभवन्ति । तदा तेषाम् आनुकूल्यसम्पादनाय उपायाः चिन्तनीयाः । किमर्थं संस्कृतसम्भाषणं करणीयम्, एतद् कियद् पवित्रं, पुण्यप्रदं च कार्यम्, केन प्रकारेण एतद् राष्ट्रियं कर्तव्यम् अस्ति - इत्यादिरूपेण तान् उद्बोधयितुं प्रयतनीयम् । कदाचित् विरोधे सत्यपि स्वकर्तव्यं न त्यक्तव्यं भवेत् । तदा गृहे उभयभाषाव्यवहारः भवेत् । तावान् अपि लाभः एव । स्वस्मिन् आग्रहे सति मार्गाः स्फुरन्ति एव । देशे यावद् अधिकानि संस्कृतगृहाणि भवन्ति तावान् अधिकः संस्कृतप्रचारः भवति । संस्कृतस्य शक्तेः वर्धनं भवति । संस्कृतं चिरस्थायि भवति ।

संस्कृतगृहस्य बालाः यदा धाराप्रवाहरूपेण, मातृभाषारूपेण संस्कृतेन वदन्ति तदा तद् श्रुत्वा कियान् आनन्दः भवति ! बालाः बहु शीघ्रं भाषां गृह्णन्ति । केषुचित् गृहेषु पिता पुत्रेण पुत्र्या वा सह संस्कृतेन वदति, केषुचित् गृहेषु माता वदति । परिणामतः बाल्ये एव बालानां संस्कृतस्य धाराप्रवाहसम्भाषणसामर्थ्यं भवति । कीदृशाः भाग्यवन्तः ते बालाः! तैः पितृभिः स्वपुत्रेभ्यः का अन्या सम्पद् दातव्या !

द्विविधं संस्कृतगृहम्

कार्यवर्धनदृष्ट्या संस्कतगृहाणि द्विधा विभक्तुं शक्यन्ते । संस्कृतगृहम्, आदर्शसंस्कृतगृहं च इति । येषु गृहेषु प्रतिदिनं कञ्चित् कालं, केचन संस्कृतेन व्यवहारं कुर्वन्ति तानि गृहाणि संस्कृतगृहाणि । येषु गृहेषु दिनस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्विंशतिः घण्टाः अपि संस्कृतेन एव सम्भाषणं भवति तानि गृहाणि आदर्शसंस्कृतगृहाणि । संस्कृतगृहाणि व्यापकतया भवेयुः, परन्तु आदर्शसंस्कृतगृहाणि सद्यःपरिस्थितौ स्वल्पसंख्यया तत्र तत्र भवितुमर्हन्ति । आदर्शसंस्कृतगृहाणां संख्या यावती अधिका भवति तावत् वृक्षस्य मूलानि भूमौ गभीरतरं गतानि इव इति चिन्तयितुं शक्नुमः ।

बाल्यतः भवतु संस्कृतसंस्कारः

वयं जानीमः यत् भारते पूर्वं पाणिनि-कालिदास-बाणादयः जाताः। परं सद्यः तादृशमहापुरुषाः प्रतिभाशालिनः वा संस्कृतक्षेत्रे न जाताः । किमर्थम्? तदा संस्कृतं समाजव्याप्तम् आसीत्, नित्यजीवने आसीत्, शिक्षायाः माध्यमम् आसीत्, बाल्यतः संस्कृतसंस्कारः आसीत् । अतः तादृशे सामाजिकवातावरणे तदनुरूपाः निर्मिताः । परन्तु अद्य...? यदि अद्य कतिचन शतसंख्याकानां बालानां बाल्यतः संस्कृतसंस्कारः भवति, वास्तविकतया तेषां मातृभाषारूपेण संस्कृतम् अस्ति, किञ्च बाल्यतः आरभ्य तेषां बालानां संस्कृतकाव्यानां शास्त्राणां च प्रधानविषयरूपेण पाठनं भवति, तर्हि तेषु बालेषु केचन नव-पाणिनि-कालिदास-बाणाः भवितुम् अर्हन्ति ! संस्कृतमाता आधुनिक-पाणिनि-कालिदासबाणानां प्रतीक्षायाम् अस्ति !

अस्माकं मातृभाषायाः तथा च भावनानां च महान् सम्बन्धः । तस्मात् एव कारणाद् मातृभाषया सह कश्चन आत्मीयसम्बन्धः। यावदपि संस्कृताभिमानस्य भाषणं कृतं चेदपि यदा संस्कृतगृहस्य प्रश्नः आगच्छति तदा मातृभाषां त्यक्त्वा संस्कृतं स्वीकर्तुं मनः नाङ्गीकरोति । सम्भाषणशिबिरे, सभायां, विद्यालये वा संस्कृतेन भाषितुं शक्यते । परन्तु गृहे तेन भाषणे कृत्रिमता अनुभूयते । कारणं तु पुनः पुनः प्रयोगस्य परिणामतः यः आत्मीयताभावः निर्मितः भवति तादृशभावः संस्कृतविषये कदापि न अनुभूतः । परन्तु यत्नः आरब्धः चेत् दिनेषु गच्छत्सु अवश्यमेव संस्कृतभाषणे सहजता अनुभूयते एव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बाधन्ते प्रश्नाः

केचन प्रश्नं कुर्वन्ति यत् 'सर्वे अपि मातृभाषां परित्यज्य संस्कृतेन व्यवहरन्ति चेत् मातृभाषायाः का गतिः भवेत्' इति। सा स्थितिः आगच्छतु नाम। तदा सम्भाषणसन्देशे पुनः लेखं लेखिष्यामः यत् इदानीं संस्कृतसम्भाषणकर्तारः पर्याप्ताः इति। पुनश्च केषाञ्चित् प्रश्नः भवति यद् मातृभाषा संस्कृतं भवति चेत् बालानां बौद्धिकविकासः पूर्णरूपेण भवति किम्' इति। इदानीं कर्णाटके उपदशबालाः संस्कृतमातृभाषिणः सन्ति येषां बुद्धिमत्ता असाधारणी, तीक्ष्णा, प्रगता च अस्ति। अतः संस्कृतभाषया एव बालानां लालने वर्धने च किञ्चिदपि सङ्कोचः भयं वा नैव कर्तव्यम्। गृहे संस्कृतसम्भाषणे अपि प्रतिगमनं न कर्तव्यम्। यत्किमपि महत् कार्यं साधनीयं चेत् तदर्थं किञ्चित् मूल्यं दातव्यं भवति। यदि तस्य मूल्यस्य दातारः वयं भवितुं शक्नुमः तर्हि अस्माकं जीवनं सार्थकं भवितुमर्हति।

अद्य संस्कृतस्य नवपरम्परानिर्माणाय, व्यावहारिकतां प्रतिष्ठापयितुं च समग्रे देशे प्रतिजनपदं द्वित्राणाम् आदर्शसंस्कृतगृहाणां आवश्यकता अस्ति। अतः तदर्थं संस्कृतज्ञयुवतियुवकैः जीवनध्येयवद्भिः भवितव्यम्। महत्त्वाकाङ्क्षया त्यागेन च विना एतत् महत् कार्यं साधयितुं न शक्यम्। युवतयः सामान्यतः एतदनुकूलाः दृश्यन्ते। तादृशानां ध्येयवादिनां युवकानां एव आधिक्येन आवश्यकता अस्ति अद्य।

संस्कृतगृहं तावत् संस्कृतभाषापुनरुज्जीवन-आन्दोलनस्य आधारभूत-कार्यक्रमेषु अन्यतमः। गृहे गृहे संस्कृतसम्भाषणं भवेत्। गृहे गृहे संस्कृताभ्यासः भवेत्। गृहे गृहे संस्कृतपुस्तकानि भवेयुः। गृहे गृहे संस्कृतशास्त्रपाठः भवेत्। लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि!

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पाण्डित्यस्य अपरः निकषः

५

भाषायाः प्रयोजनमेव भावाभिव्यक्तिः । यदि तया भाषया उक्तं किञ्चित् श्रोता न अवगच्छति तर्हि तस्य भाषणस्य उद्देशः एव साधितः न भवति । अतः तादृशी भाषा प्रयोक्तव्या, येन श्रोता पठिता वा अवगच्छेत् ।

'डिम्बः कीलालमश्नाति' इति वाक्यस्य पठनेन अधिकांशजनानां (अधीतशास्त्रान् व्युत्पन्नान् च विहाय अन्येषां) सरलतया अर्थबोधः न भवति । परन्तु तमेव आशयं 'शिशुः जलं पिबति' इति वाक्येन प्रकटयितुं शक्यते । प्रथमवाक्यं प्रौढसंस्कृतस्य उदाहरणं, द्वितीयं तु सरलसंस्कृतस्य । 'शिशुः जलं पिबति' इति वाक्यम् अनधीतसंस्कृतः अपि अवगन्तुं शक्नोति ।

सर्वासामपि भाषाणां मुखद्वयं भवति । प्रौढं सरलं च इति । सामान्यतः प्रत्येकं भाषायाः वाङ्मयभाषा प्रौढा भवति, व्यवहारभाषा सरला भवति । आङ्ग्लभाषायाम् अपि सम्भाषण-आङ्ग्ला सरला, शेक्सपियर्-आङ्ग्ला च प्रौढा । प्रौढभाषा तावत् दुरवगम्या भवति ।

पराभवस्य कारणद्वयम्

अद्य जनानां मनसि 'संस्कृतं कठिनम्' इति भावना दृढमूला अस्ति । भारतस्य स्वतन्त्रतायाः अनन्तरं भाषानीतिनिर्णयसमये संस्कृतेन पराभवप्राप्तौ कारणद्वयम् अस्ति । प्रथमं तु संस्कृतपक्षतः समर्थनपरकार्यं कर्तुं काचित् सङ्घटनशक्तिः नासीत्, यथा आङ्ग्लभाषायाः पृष्ठतः क्रिश्चियन् मिशनरी, अधिकारिवर्गः; आङ्ग्लमाध्यमशिक्षितजनाः च आसन्; उर्दूभाषायाः पृष्ठतः महम्मदीयाः, अल्पसंख्याकतुष्टीकरण-नीतिपटवः राजनीतिज्ञाः च आसन्; तथा च हिन्दीभाषायाः पृष्ठतः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वातन्त्र्यान्दोलने गृहीतभागाः काङ्ग्रेस्-जनाः आसन् । द्वितीयं कारणमस्ति संस्कृतम् कठिनमिति जनानां भावना । 'संस्कृतज्ञाः संस्कृतशिक्षकाः एव १०-१५ वर्षाणाम् अध्ययनानन्तरमपि यदा संस्कृतेन व्यवहर्तुं न शक्नुवन्ति तर्हि अन्ये कथं शक्नुयुः ?' इति प्रश्नः आसीत् । अपि च ये केऽपि विद्वांसः तदा संस्कृतेन वदन्ति स्म, ते तावत् वाङ्मयस्य शास्त्राणां वा अध्ययनबलात्, तदभ्यासवशात् च तादृशप्रौढशैल्या वदन्ति स्म । तैः क्रियमाणं भाषाप्रयोगं जनाः बोद्धुं न शक्नुवन्ति स्म । अतः तादृशी अनुच्यमाना अनवगम्यमाना च 'कठिनभाषा' कथं वा देशस्य सम्पर्कभाषा भवितुमर्हति इति कारणात् संस्कृतपक्षस्य वादः अव्यावहारिकः इति, अशक्यः इति च तिरस्कृतः भवति स्म ।

इदानीं पुनरेकः निर्णायकः सन्निवेशः आगमिष्यति । मान्यवरस्य डा० मुरलीमनोहरजोशीमहोदयस्य प्रयत्नेन (शिक्षामन्त्रिणां सम्मेलनप्रसङ्गेन) संस्कृतं पुनरपि चर्चाविषयः जातः अस्ति । एषा राष्ट्रियचर्चा अग्रे अनुवर्तिष्यते । अग्रिमवर्षं संस्कृतवर्षम् इति आचरिष्यते इति कारणतः अपि संस्कृतसम्बन्धिनी चर्चा इतोऽपि व्यापकतया भवेत् । अतः अयम् अस्माभिः प्राप्तः द्वितीयः अवसरः इति मन्तव्यम् ।

सरलं, न तु सरलीकृतम्

'संस्कृतं कठिनम्' इति जनमानसे विद्यमाना भावना एतावती हानिकारिणी यत् सा व्यक्तेः मनसि संस्कृतस्य परतया चिन्तनस्य प्रारम्भमेव निवारयति । अतः एतस्मिन् बौद्धिकयुद्धे संस्कृतेन जयः प्राप्तव्यः चेत् सर्वैः संस्कृतज्ञैः कतिचन वर्षाणि यावत् सम्भाषणे, भाषणे, लेखने च सरलतमस्य संस्कृतस्य एव प्रयोगः करणीयः । राज्ये राज्ये सरलसंस्कृतस्य विषये अध्ययनं करणीयम् ।

बहुभ्यः दशकेभ्यः संस्कृतानुरागिणः 'संस्कृतस्य सरलीकरणम् आवश्यकम्' इति वदन्तः आसन्, सन्ति च । सरलसंस्कृतं सरलीकृतसंस्कृतम् इति द्वयमपि भिन्नं भिन्नं भवति । सरलीकरणं नाम नियमानां परिवर्तनं, नूतनानां नियमानां रचना, नियमानां त्यागः इत्यादि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथा परिवर्तनं क्रियते चेत् संस्कृतं संस्कृतत्वेन न तिष्ठेत् । अपरा प्राकृतभाषा सृष्टा भवेत् । तद् अस्माकम् इष्टं न । किञ्च, तेन क्रमशः वयं प्राचीनवाङ्मयम् अवगन्तुम् अपि न शक्नुयाम । वयम् अपाणिनीयं किमपि न कुर्मः । पाणिनीयनियमानां परिधौ एव 'सरलसंस्कृतम्' इति किञ्चित् कल्पयितुं शक्यते । अतः सरलसंस्कृतम् आवश्यकं, न तु सरलीकृतसंस्कृतम् ।

सारल्यस्य किं मानम् ?

सरलम् इति सापेक्षः शब्दः । एकमेव किञ्चित् वाक्यं व्यक्त्यनुगुणं कठिनतमं, कठिनतरं, कठिनं, सरलं, सरलतरं, सरलतमं च भवितुम् अर्हति । तर्हि सारल्यस्य मानकं किम् ? संस्कृतप्रचारं कर्तुम् उद्युक्तानाम् अस्माकम् उद्देश्यं भवेत् यत् अनधीतसंस्कृताः सामान्यजनाः अपि अस्माभिः भाष्यमाणं संस्कृतं श्रुत्वा अर्थं ज्ञातुं शक्नुयुः इति । अतः अस्माभिः तथा भाषणीयं, तादृशं संस्कृतं प्रयोक्तव्यम् । अतः सारल्यस्य निर्णायकाः श्रोतारः, पठितारः वा जनाः एव । बहुत्र एवं भवति यत् कस्मिंश्चित् समानकार्यक्रमे कश्चन विद्वान् संस्कृतज्ञः संस्कृतेन भाषणं करोति, संस्कृतसम्भषाणशीलः कश्चन कार्यकर्ता अपि भाषणं करोति । कार्यक्रमानन्तरं जनाः वदन्ति यत् ''वयं विदुषः भाषणं न अवगतवन्तः, परन्तु कार्यकर्तुः भाषणं पूर्णतः, शब्दशः ज्ञातवन्तः'' इति । अत्र कारणम् एवम् अस्ति यत् पूर्वतनः ग्रान्थिकभाषायाः प्रयोगं कृतवान्, अपरः व्यावहारिकभाषायाः प्रयोगं कृतवान् । (अत्र 'ग्रान्थिकभाषा' इति शब्दः तु व्यावहारिकदृष्टिम् अविचिन्त्य, श्रोतॄन् मनसि अकृत्वा च ग्रन्थाध्ययनबलेन स्वेन ज्ञातया काव्यरचनानुकूलया प्रौढभाषया क्रियमाणः वाग्व्यवहारः इत्यर्थे प्रयुक्तः । तथा तु संस्कृते इतरभाषासु यथा भवति तथा ग्रान्थिकभाषा, व्यावहारिकभाषा इति भाषाप्रभेदः नास्ति । उभयमपि समानम्, उभयमपि पाणिनीयं च ।) अतः भाषायाः सरलतायाः निर्णये सामान्यजनानां सुखावगम्यता एव आधारः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्माभिः तादृशं सरलं संस्कृतम् अनुसन्धातव्यम् अनुसरणीयं च यत् अस्माकं संस्कृतं श्रुत्वा श्रोता वदेत्, चिन्तयेत् वा यत् 'किमहं मम मातृभाषामेव शृण्वन् अस्मि !' इति । तदा संस्कृतभाषा सर्वजनग्राह्या भवति । छात्राणां हृदयाकर्षिका भवति, जनैः अपेक्षिता भवति, अधीता च भवति । तदा एव संस्कृतभाषा देशस्य नीतिनिर्णायकैः स्वीकारार्हा भविष्यति ।

सरलसंस्कृतं नाम...

'सरलसंस्कृतम् इत्युक्ते कीदृशम्' इति चिन्तयामः । सर्वासु भारतीयभाषासु अधिकप्रमाणेन संस्कृतशब्दाः सन्ति । अस्माभिः मातृभाषायां प्रचुरतया प्रयुज्यमानान् संस्कृतशब्दान् स्वीकृत्यैव व्यवहारः करणीयः । यथाशक्ति तैः शब्दैः एव निर्वाहं कर्तुं प्रयत्नः करणीयः । संस्कृतशब्दानाम् अभावे संस्कृतसमीपस्थाः शब्दाः स्वीकरणीयाः । मातृभाषायां ये संस्कृतजन्य-(तद्भव)शब्दाः सन्ति तेषां मूलसंस्कृतशब्दानां प्रयोगेण अपि अर्थावगमने सारल्यं भवति । कदाचित् मातृभाषायाम् अपि समाने अर्थे कतिचन संस्कृतशब्दाः भवन्ति । तदा तेषु प्रसिद्धतमः शब्दः स्वीकरणीयः ।

अत्यन्तम् आवश्यकानां सीमितानामेव शब्दानां वाक्यरचनानां च प्रयोगेण सरलता भवति । अर्थावबोधाय अनिवार्याणां शब्दानां केवलं प्रयोगः भवति चेत् अध्येतॄणां श्रमः न्यूनः भवति । उदाहरणार्थं सामान्यव्यवहाराय ४०-५० धातवः पर्याप्ताः भवन्ति । अन्यान् अर्थान् (क्रियाः) भू - कृ - इति धातुद्वयस्य योगेन प्रकटयितुं शक्नुमः । अतः दैनन्दिनव्यवहाराय अपेक्षितानां न्यूनतमशब्दानां न्यूनतमवाक्यरचनानां च सङ्ग्रहः करणीयः । एतद् 'मूलभूतं संस्कृतम्' अथवा 'अत्यावश्यकं संस्कृतम्' इति किञ्चित् भवितुम् अर्हति । एतद्विषये शोधः करणीयः ।

वाक्येषु सन्धिः न भवेत् । दीर्घसमासः न करणीयः । (क्वचित् समासकरणमेव सरलं भवति । यथा 'अधिकारिणः समीपम्' इत्यपेक्षया 'अधिकारिसमीपम्' इति ।) सन्धयः संस्कृतज्ञानाम् अस्माकं कृते तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सरलाः । परन्तु संस्कृतानभिज्ञाः सन्धियुक्तवाक्यानां पठने कष्टम् अनुभवन्ति ।

वाक्यं यावच्छक्यं लघु भवेत् । दीर्घ-सुदीर्घ-वाक्यरचनापेक्षया तेषां खण्डं कृत्वा लघूनि वाक्यानि निर्मातव्यानि । तेषु वाक्येषु अपि अर्थावबोधाय ये शब्दाः अनिवार्याः ते एव भवेयुः । मुख्यार्थबोधने अनपेक्षिताः शब्दाः वाक्ये भवन्ति चेत् अर्थबोधे बाधा भवति ।

स्वीक्रियमाणाः शब्दाः उच्चारणसरलाः, यावच्छक्यं ललिताक्षरयुक्ताः भवेयुः । किञ्च ते शब्दाः प्रयोगसरलाः अपि भवेयुः ।

एकस्मिन् अर्थे एकमेव पदं प्रयोक्तव्यम् । यथा - 'विद्यते, वर्तते, अस्ति' इत्यादिषु 'अस्ति' इति एकमेव पदं प्रयोक्तव्यम् । तदेव पुनः पुनः श्रुत्वा श्रोता शीघ्रं गृह्णाति । तस्य भ्रमः अपि न भवति । 'एकस्मिन् अर्थे एकं पदम्' इति यथा अस्ति तथैव 'एकं पदम् एकस्मिन् अर्थे' इति अपरः विचारः । कस्यचित् पदस्य बहवः अर्थाः भवन्ति । परन्तु वयं तस्य पदस्य प्रयोगम् एकस्मिन् अर्थे एव कुर्मः ।

युष्मदर्थे भवच्छब्दः

मध्यमपुरुषस्य स्थाने भवच्छब्दस्य प्रयोगेण, द्विवचने प्रयोक्तव्ये कर्तृपदादिभिः सह द्वयमिति योजनेन च क्रियापदानां प्रयोगे एकस्य लकारस्य नवसु रूपेषु चतुर्भिः रूपैः निर्वाहं कर्तुं शक्यते । यतः भवच्छब्दस्य प्रयोगेण प्रथमपुरुषस्य प्रयोगः, द्वयमित्यस्य प्रयोगेण एकवचनस्यैव प्रयोगः इति । 'त्वम्' इत्यर्थे भवच्छब्दप्रयोगः साधुः किम् ? आम्, पूर्वप्रयोगाः यथेष्टं दृश्यन्ते । बालम् उद्दिश्य 'भवान्' 'भवती' इति कथं वक्तुं शक्यते ? इति केषाञ्चित् प्रश्नः भवति । वस्तुतः अयं तु अभ्यासस्य विषयः । यथा - इदानीं सम्भाषणशिबिराणां द्वारा ये संस्कृताभ्यासं कुर्वन्ति ते एतादृशं क्लेशं न अनुभवन्ति एव । आङ्ग्लभाषायां 'You' इति शब्दः आदरार्थे सामान्यार्थे च समानः । तत्र क्लेशः न अनुभूयते । हिन्दीभाषायां 'आप्' शब्दः सर्वेभ्यः अपि प्रयुज्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'एवं चेत् क्रमशः भवच्छब्दस्य आदरार्थः नष्टः भवेत् किम्' इति प्रश्नः भवितुम् अर्हति । परं तथा नैव भविष्यति । अन्यच्च वयं युष्मच्छब्दं न त्यक्तवन्तः । अनन्तरस्तरे पाठयामः एव ।

द्विवचनस्य न 'त्यागः'

अत्र एकः विषयः विशेषतया ज्ञातव्यः । 'द्विवचनं त्यक्तव्यम्, मध्यमपुरुषः त्यक्तव्यः' इति अस्माकं मतं सर्वथा नास्ति । केचन यदि तथा त्यक्तव्यम् इति भाषणं कुर्वन्ति तर्हि तैः स्वविचारः स्वभाषणशैली च परिवर्तनीया । सामान्यलौकिकव्यवहारे यत्र एकवचन-बहुवचनाभ्यां व्यवहारनिर्वाहं कर्तुं शक्यते (यथा - एकवचन-बहुवचनाभ्याम् इत्यत्र एकवचनं बहुवचनं चेति वचनद्वयेन) तत्र तथा एकवचनेन बहुवचनेन च, भवच्छब्देन च कार्यं साधनीयम् । तथा च भाषाशिक्षणस्य प्रारम्भिकस्तरे मध्यमपुरुषद्विवचनयोः पठनम् अकृत्वा द्वितीयस्तरे (द्वितीयसोपाने) पठनं कर्तुमपि शक्यते । (संस्कृतभारत्याः पत्राचारद्वारा संस्कृतशिक्षणे प्रथमसोपानतः एव वचनत्रयस्य पुरुषत्रयस्य च पाठः भवति । सम्भाषणसन्देशे, चन्दमामायां च किमपि अत्यक्त्वा उचितप्रमाणेन सर्वेषामपि रूपाणां प्रयोगः क्रियते एव । अस्माभिः किमपि न त्यक्तमिति सर्वैः मन्तव्यम्) वस्तुतः सरलसंस्कृतम् इति अयं विषयः 'संस्कृतं कीदृशं भवेत्' ; 'संस्कृतेन कीदृशं रूपं धारणीयम्'; 'संस्कृते कीदृशं परिवर्तनम् अपेक्षितम्' - इति प्रश्नानाम् उत्तरं नैव । ते प्रश्नाः एव अनपेक्षिताः । सरलसंस्कृतम् इति एषः विचारः कार्यतन्त्रसम्बद्धः विषयः, पाठन-विधिसम्बद्धः विषयः च । यतः संस्कृतम् अद्य कठिनम् इति परिगण्यते, तस्मात् तस्य भावस्य परिवर्तनाय सरलसंस्कृतस्यैव श्रावणेन तथा च सोपानक्रमेण, श्रमेण विना, रोचकशैल्या च पाठनेन जनमानसे संस्कृतं सरलमिति प्रतिष्ठापयितुम् एषः यत्नः ।

भूते भवतु कृदन्तम्

भूतकालार्थे भू - अस - इत्यादीन् कतिचन धातून् विहाय अन्येषां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्रियापदानां भूतकृदन्तरूपाणि सरलानि भवन्ति । लकारे लिङ्गभेदः नास्ति इति सौकर्यं चेत् भूतकृदन्ते पुरुषभेदः नास्ति इति सौविध्यम् अस्ति । भूतकृदन्तरूपाणां प्रयोगसारल्यं महदेव अस्ति । संस्कृते उपसर्गसहितानां धातूनां प्रयोगः एव अधिकः । तादृशक्रियापदानां लङादिलकार-प्रयोगसन्दर्भे अडागमस्य अकारस्य योजने बहवः दोषान् कुर्वन्ति, अपि च तानि रूपाणि अवगन्तुं छात्राः, तेषां वाक्यानाम् अर्थं बोद्धुं श्रोतारः च कष्टम् अनुभवन्ति ।

सरलं कर्तृवाच्यम्

संस्कृतज्ञाः अधिकतया कर्मवाच्येन एव व्यवहारं कुर्वन्ति । तत्र किञ्चित् सौकर्यमपि अस्ति । परन्तु अन्यासु सर्वासु अपि भाषासु कर्तृवाच्यवाक्यानाम् एव बाहुल्यम् । अतः जनानां चिन्तनम् अपि कर्तृवाच्यनिबद्धवाक्यैः भवति । अस्माकं कर्मवाच्यव्यवहारः प्रारम्भस्तरे छात्राणां क्लेशाय भवति । भाषणस्य श्रवणसमकाले अर्थबोधे अपि कष्टाय भवति । अतः कर्तृवाच्यवाक्यानां प्रयोगः अधिकतया करणीयः । परन्तु विध्यर्थे लिङः अपेक्षया कर्मार्थकयोः तव्यदनीयरयोः प्रयोगः सरलतरः ।

सरलतार्थम् एतदपि...

अमरकोषं परिशीलयामः चेत् ज्ञायते यत् तत्र अशीतिप्रतिशतं शब्दाः अकारान्तपुंल्लिङ्गाः, आकारान्त-ईकारान्तस्त्रीलिङ्गाः, अकारान्त-नपुंसकलिङ्गाः च सन्ति इति । यदि वयम् एतादृशान् शब्दान् एव स्वीकृत्य व्यवहारं कुर्मः तर्हि विभक्तिरूपाणां विषये क्लेशः न भवति । क्वचित् अन्यान्तशब्दान् अकारान्तान् कर्तुमपि शक्नुमः । यथा - 'मुनिः → मुनिवरः, राजा → महाराजः' इति ।

सरलसंस्कृतम् इत्यत्र सरलाः उपायाः इतोऽपि बहवः सन्ति । उदाहरणाय केवलं केचन अंशाः अत्र दत्ताः । क्रियापदानां विभज्य प्रयोगः – यथा – 'शये – शयनं करोमि', शेते – शयनं करोति'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्येतादृशं प्रयोगं सर्वे अपि अवगच्छन्ति । वयं श्रोतृणां कष्टम् अविचिन्त्य, अस्माभिः पुस्तकेषु ये शब्दाः पठिताः तैः शब्दैः एव भाषणं कुर्मः । तेनापि संस्कृतं कठिनम् इति चित्रितम् भवति । 'अमुकः आध्यक्ष्यं वहति' इत्यपेक्षया 'अध्यक्षतां वहति' इति शब्दप्रयोगः यदि क्रियते तर्हि सरलं भवति ।

श्रोतृणां सरलतया अवगमने अस्माकं भाषणरीतिः कारणं भवति । तदर्थं वयं मन्दं मन्दं वदेम, प्रतिशब्दं स्पष्टं वदेम । (संस्कृतेन धाराप्रवाहरूपेण सम्भाषणस्य येषां रूढिः अभवत्, ते तावत् मातृभाषया यथा वदन्ति तथा वेगेन वदन्ति । तैः विशेषतया सावधानैः भूत्वा अत्यन्तं मन्दवेगेन भाषणीयं भवति ।) शब्दान् विभज्य वदेम, साभिनयं च वदेम । आरम्भे एतादृशं भाषणं कृत्रिमं भासते । परं क्रमशः अभ्यासः भवति । यदि वयं संस्कृतप्रचारं कर्तुम् इच्छामः तर्हि अस्माभिः तदर्थं कष्टसहनरूपं मूल्यं दातव्यम् । साभिनयभाषणाय सङ्कोचत्यागरूपं मूल्यं दातव्यम् । उपहासपात्रत्वरूपं मूल्यमपि दातुं सिद्धैः भवितव्यम् । अस्माकं संस्कृतप्रेम्णः परीक्षा एषा ।

मातृभाषायां वाक्येषु शब्दविन्यासः येन क्रमेण भवति, तेनैव अन्वयक्रमेण अस्माभिः संस्कृतवाक्यरचना करणीया । तदा एव श्रोतारः सरलतया अवगच्छन्ति । संस्कृतवाक्येषु यत्र कुत्रापि शब्दविन्यासं कर्तुं शक्यते इति नियमबलेन यदि यथाकथञ्चित् वाक्यरचना क्रियते तर्हि संस्कृतं कठिनम् इति आक्षिप्तं सत् (आक्षेपः न, तदा तु सत्यमेव) उपेक्षायाः चरमसीमां प्रति प्रेषितं भवेत् ।

प्रतिप्रदेशं भिद्यते भाषा

प्रतिराज्यं संस्कृतेन सरलेन भवितव्यं चेत् शब्ददृष्ट्या वाक्यरचनादृष्ट्या च तत्तत्प्रदेशभाषायाः समीपं प्रति संस्कृतम् आनेतव्यम् । तदा 'प्रादेशिकभाषाणां प्रभावकारणतः संस्कृतस्य अखिलभारतत्वं न भवेत्, तेन भारतीयम् ऐक्यं कथं स्यात् ?' इति केचन पृच्छन्ति । संस्कृते पूर्वमपि प्रदेशानुसारं बहवः भिन्नाः शब्दाः प्रयुज्यन्ते स्म एव । विश्वे इतरासु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

सर्वासु भाषासु अपि सा एव स्थितिः । भारते कदापि कस्मिन्नपि विषये बाह्या एकरूपता नासीदेव । विविधतायाम् एकता तु आसीत् । संस्कृते अपि तथैव आसीत्, इदानीमपि अस्ति, अग्रे अपि भविष्यति । एषः प्रकृतिधर्मः । प्रथमं वयं सर्वैः उपायैः, सर्वाः शक्तीः योजयित्वा च संस्कृतभाषां जनभाषां कुर्मः । प्रथमं पुत्रस्य जननं भवतु, पुत्रेण कथं व्यवहरणीयम् इति, कः विद्यालयः गन्तव्यः इति वा अनन्तरं चिन्तयामः । सेतुः यदा आगमिष्यति तदा क्रमणं करिष्यामः । इदानीं किमर्थं चिन्ता ? प्रकृतं तावत् प्रतिराज्यं संस्कृतं सरलं कथं भवेत् (तत्रत्यभाषानुगुणम्) इति विचिन्त्य तदनुगुणसरलभाषया, तत्क्षेत्रानुगुणसरलभाषया च व्यवहारः करणीयः । पाणिनीयत्वम् एकं रक्षामः चेद् पर्याप्तम् । पश्चात् तद् रक्षति रक्षितम् । किञ्चित्कालं यावत् केचन क्लेशाः भवेयुः । यथा दक्षिणे 'उपन्यासः' इत्युक्ते भाषणम् इत्यर्थः, हिन्दीक्षेत्रे तु 'उपन्यासः' इत्युक्ते दीर्घकथा । एवं बहवः शब्दाः सन्ति । कालक्रमशः सर्वमपि सुष्ठु भविष्यति । इदानीन्तनचिन्ता तावत् भवेत् - संस्कृतं सरलम् इति चित्रनिर्माणम् ।

सम्भाषणं चर्चाविषयः न

संस्कृतज्ञाः संस्कृतविद्यालयेषु अथवा संस्कृतज्ञानां मध्ये संस्कृतेन शास्त्रचर्चां काव्यचर्चां वा कुर्वन्ति, अथवा भाषन्ते । तत्र सर्वे तादृशस्य प्रौढसंस्कृतस्य शास्त्रीयायाः काव्यगतभाषायाः अवगन्तारः इति कारणतः ते 'मम संस्कृतं सर्वे अवगच्छन्ति' इति चिन्तयन्ति । संस्कृतज्ञः संस्कृतविद्यालयतः अथवा संस्कृतज्ञवर्तुलतः बहिः आगत्य अनधीत-संस्कृतैः सह, सामान्यजनैः सह वा २४ घण्टाः यावत् संस्कृतेन व्यवहारं करोतु, तदा जनान् संस्कृतेन बोधयितुं कियत् कष्टं भवतीति ज्ञातुं शक्नोति । जनानां भीतिं निवारयितुं सरलसंस्कृतस्य आवश्यकतायाः परिज्ञानं तस्य भवति ।

बहुषु कार्यक्रमेषु वयं संस्कृतज्ञान् संस्कृतेन भाषणं कर्तुं निवेदयामः । तदा ते संस्कृतज्ञाः वदन्ति – ''श्रोतारः संस्कृतं न जानन्ति, संस्कृतेन वदामि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चेत् अवगन्तुं न शक्नुवन्ति । अतः मातृभाषया वदामि'' इति । वस्तुतः अत्र 'ते न अवगच्छन्ति' इति इतरेषां दूषणापेक्षया 'ते यथा अवगच्छेयुः तथा सरलतमेन संस्कृतेन वक्तुम् अहं न शक्नोमि' इति चिन्तनं करोति चेत् सः संस्कृतज्ञः सरलसंस्कृतस्य अभ्यासस्य आरम्भं कुर्यात् । तेषु कार्यक्रमेषु जनाः संस्कृतं श्रोतुम् आगच्छन्ति । मातृभाषां श्रोतुं तेषाम् अन्ये बहवः अवसराः भवन्ति । संस्कृतकार्यक्रमेषु अपि यदि वयं संस्कृतं न श्रावयामः तर्हि वयं संस्कृतस्य 'पृष्ठे छुरिकाघातकर्तारः' एव भवामः । वयमेव संस्कृतं परित्यजामः, न तु अन्ये । संस्कृतेन भाषणीयम् इत्यस्मिन् विषये सन्धिः न करणीयः । सः अचर्च्यः विषयः । सर्वैः सह संस्कृतभाषणाय सरलसंस्कृतस्य अनुसन्धानं करणीयम् । तद्विषयकं प्रयत्नपूर्वकं चिन्तनं मनसि सदा करणीयम् ।

इच्छां वर्धयति सरलता

आङ्ग्लभाषायां 'Appetizer' इति कश्चन शब्दः अस्ति । भोजनतः पूर्वं 'सूप्' इत्यादिकं यद् दीयते तदेव 'Appetizer' इति कथ्यते । तस्य पानेन भोजनेच्छा वर्धते । सरलसंस्कृतं तादृशम् इच्छावर्धकम् इति चिन्तयतु ! तन्नाम सरलसंस्कृतं जनान् संस्कृतोन्मुखान् करोति, आकर्षति । संस्कृताध्ययनस्य उत्साहनिर्माणं करोति । संस्कृतानुकूलवातावरणनिर्माणं करोति । संस्कृतप्रचारकार्यस्य मार्गं प्रशस्तं करोति । बाधाः निवारयति । मानसिकान् अवरोधान् (Mental blocks) निवारयति । सरलसंस्कृतं प्रौढसंस्कृतस्य, संस्कृतवाङ्मयस्य, शास्त्राणां च प्रवेशद्वारम् ।

कुत्र ? कियत्पर्यन्तम् ?

तर्हि सरलसंस्कृतस्य प्रयोगः कुत्र कुत्र ? अपि च कियत्पर्यन्तम् ?

सर्वैः संस्कृतविद्वद्भिः संस्कृतशिक्षकैः च सरलसंस्कृतेन वक्तव्यम् - स्वगृहे, विद्यालये, समाजे च । स्वगृहम् एकं लघु अङ्गम् - लघु जगत्, अस्मदीयमेव । तत्र दोषभयमपि नास्ति । तत्र भाषणेन अभ्यासः अपि भवति । विद्यालयः किञ्चित् विशालतरं जगत् । तत्रापि दोषभयं नास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यतः अस्मान् विहाय अन्ये सर्वे छात्राः । विशाले समाजे सर्वैः सह अपि सरलसंस्कृतेन भाषणीयम् ।

सम्भाषणे, भाषणेषु, पाठ्यपुस्तकेषु, संस्कृतपत्रिकासु, आकाशवाणी-दूरदर्शनवार्तासु, नाटकरूपकादिकार्यक्रमेषु च सरलसंस्कृतस्य एव प्रयोगः करणीयः । यतः एतेषां द्वारा जनाः संस्कृतसम्पर्कम् आगच्छन्ति । दूरदर्शने शाकुन्तलादि-संस्कृतनाटकानां प्रसारः यदा भवति तदा दूरदर्शनवीक्षकाः जनाः वदन्ति - "नाटकं तु बहु एव उत्तमम् आसीत्, परन्तु वयं किमपि न अवगतवन्तः" इति । यावत्पर्यन्तं देशे विद्यमानाः सर्वे संस्कृतज्ञाः सरलसंस्कृतस्य प्रयोगं न कुर्वन्ति तावत्पर्यन्तं दूरदर्शनादिषु संस्कृतनाटकादीनां प्रदर्शनेन संस्कृतस्य एव हानिः । यतः तेषां वीक्षकाः कतिचन कोटिजनाः तां प्रौढभाषां न अवगच्छन्ति इति कारणतः तावतां मनसि संस्कृतं कठिनम् इति भावना पुनः दृढीकृता प्रमाणिता च भवति । यावत्पर्यन्तं प्राथमिकमाध्यमिकस्तरयोः संस्कृतपाठ्यपुस्तकानां परिवर्तनं न भवति तावत्पर्यन्तं संस्कृतचित्रपरिवर्तनं न भवेत्, यतः एतानि पाठ्यपुस्तकानि एव प्रतिवर्षं कोट्यधिकच्छात्राणां मनसि संस्कृतं कठिनम् इति भावनानिर्माणस्य यन्त्रागाररूपेण सन्ति ।

संस्कृतं कठिनम् इति दृढरूपं भावं समूलम् उत्पाटयितुं - तन्नाम सम्भवतः विशाले एतस्मिन् देशे शताधिकवर्षेभ्यः रूढमूलं संस्कारं परिवर्तयितुं १०-१५ वर्षाणि आवश्यकानि भवेयुः । अतः तावत्पर्यन्तम् अस्माभिः सरलसंस्कृताय एव प्राथमिकता दातव्या । तथा सति एवं न चिन्तनीयं यत् सरलसंस्कृतमेव स्थिरं भवेत् इति । यतः केऽपि प्रथमकक्ष्यायामेव नैव उपविशन्ति, अग्रे गच्छन्त्येव । साक्षात् दशमकक्ष्याप्रवेशः न भवति । प्रथमकक्ष्यातः शिक्षायाः आरम्भः भवति । वयम् अद्यत्वे दशमकक्ष्यायाः पाठं प्रथमकक्ष्यायां पाठयामः ।

केषाञ्चित् अङ्गुलिगणनीयानां मनसि भयं भवति यत् सरलसंस्कृतव्यवहारेण संस्कृतं नष्टं भवेत् इति । परन्तु क्षेत्रे विद्यमानाः कार्यरताः प्रत्यक्षतः अनुभवन्ति यत् सरलसंस्कृतस्य प्रयोगद्वारा संस्कृतक्षेत्रे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कथं नवचैतन्यनिर्माणं जायमानम् अस्ति, भाषा केन वेगेन वर्धमाना अस्ति इति । अतः भयस्य काचिदपि प्रसक्तिः नास्ति ।

मा त्यजन्तु वचनानि

अत्र कश्चन प्रसङ्गः मया स्मर्यते । अस्मदीयः कश्चन कार्यकर्ता वैयाकरणः संस्कृतेन सर्वदा वदति स्म । कदाचित् अन्ये केचन संस्कृतज्ञाः तं मातृभाषया पृष्टवन्तः – "कथं भवान् द्विवचनं त्यक्तवान् अस्ति ?"

तदा एतेन वैयाकरणेन उक्तम् – "अस्माभिः द्विवचनं न त्यज्यते, आरम्भे प्रकारान्तरेण कथ्यते, पश्चात् पाठ्यते एव । अस्तु नाम, भवन्तः तु वचनत्रयमपि त्यक्तवन्तः खलु !"

तदा तस्य भावम् अवगत्य तेषु कश्चन विद्वान् उक्तवान् – "सत्यम्, एतेन प्रयासेन संस्कृतं नष्टं न भविष्यति, भविष्यति चेदपि तद् शुद्धं संस्कृतम् इदानीं यथा ग्रन्थेषु केवलम् अस्ति तथा तु अनन्तरमपि ग्रन्थेषु तथैव भविष्यति । किमर्थं चिन्ता ?" इति ।

औषधायते सरलसंस्कृतम्

स्वामी विवेकानन्दः – "भारतस्य सर्वे पण्डिताः वेदान्तग्रन्थान् पिधाय क्रीडाङ्गणं गत्वा Football क्रीडेयुः" इति उक्तवान् आसीत् । तस्य अर्थः अयं न यत् विवेकानन्दस्य वेदान्तविषयिणी श्रद्धा नासीदिति । वेदान्तस्य धर्मस्य च पुनः प्रतिष्ठापनमेव तस्य जीवितोद्देशः आसीत् । तदर्थमेव सः स्वीयं प्रत्येकं श्वासं श्वसितवान् । तस्य तादृशभाषणेन हिन्दुसमाजेन कियन्मात्रेण शक्तिसम्पादनं करणीयं, तस्य आवश्यकता कियती अस्ति इत्येतत् ज्ञायते । एवमेव यदि वयं सर्वे कतिचन वर्षाणि यावत् 'सरलसंस्कृतम्' इति तदेव जपं कुर्वन्तः भवामः तर्हि तस्य आशयः एवं न यत् प्रौढसंस्कृतं नावश्यकम् इति । अद्यतन-आवश्यकता सरलसंस्कृतम् ! युगानुकूलभाषा सरलसंस्कृतम् ! कालधर्मः सरलसंस्कृतस्य प्रयोगः । सामयिकी संस्कृतसेवा सरलसंस्कृतार्थम् आग्रहः । रुग्णाय तत्क्षणजीवन-दानाय दीयमानम् औषधमिव सरलसंस्कृतम् । संस्कृतद्वेषिणां 'संस्कृतं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कठिनम्' इति आग्नेयास्त्राय अस्माकं वारुणास्त्रं सरलसंस्कृतम् ! भारतस्य शतकोटिजनान् सरलसंस्कृतस्वादम् आस्वादयामः वयम् ।

एतदर्थं राज्ये राज्ये सरलसंस्कृतविषये कार्यशालाः भवेयुः । गोष्ठ्यः भवेयुः । पुस्तकानि प्रकाशितानि स्युः । शोधच्छात्राः स्वप्रदेशानुगुणं सरलसंस्कृतविषये शोधकार्याणि कुर्युः । प्राचीनवाङ्मये विद्यमानानि सरलरूपाणि बहिः प्रकाशयितुं शोधकार्याणि स्वीकुर्युः । एकैकः एकैकं ग्रन्थं स्वीकृत्य अध्ययनं कुर्यात् ।

अद्य जागतिकचिन्तनमपि सरलभाषादिशि एव अस्ति । एतस्य शताब्दस्य आरम्भभागे आङ्ग्लादिसर्वभाषासु प्रौढभाषायाः शैली सर्वैः आद्रियते स्म । परन्तु अद्यत्वे समग्रे विश्वे सर्वासु अपि भाषासु वाङ्मयेषु च तादृश्याः 'विद्वदौषधभाषायाः' प्रयोगः न भवति, अपि तु सरलतमभाषायाः । यदि वयं संस्कृतज्ञाः बहिस्ताद् कमपि पाठं पठामः तर्हि अत्र अस्ति चिन्तनीयः विषयः ।

यदि सम्भाषणशिबिराणि अद्य यशस्वीनि, जनाकर्षकाणि च सन्ति, यदि जनाः शीघ्रं संस्कृतेन सम्भाषणाभ्यासं कुर्वन्तः सन्ति, यदि जनाः संस्कृतसम्भाषणेन आनन्दम् अनुभवन्ति, तर्हि तत्र बहु मुख्यं कारणं सरलसंस्कृतम् ।

अभ्यासः अपरिहार्यः

पञ्चदशवर्षेभ्यः पूर्वं तिरुपतौ सम्भाषणशिबिराणि प्राचलन् । शिबिरानन्तरं तत्रत्याः व्युत्पन्नाः पण्डिताः संस्कृतप्राध्यापकाः केचन शिबिराणाम् अनुवर्तिशिक्षणाय साप्ताहिकमेलनादिकं चालयन्ति स्म । तदा तैः अनुभूतं यद् अद्यपर्यन्तं वयं प्रौढसंस्कृतेन वदामः स्म । परन्तु सरलसंस्कृतेन सर्वदा भाषणीयं चेत् महान् अभ्यासः एव करणीयः भवति, सरलसंस्कृतेन भाषणमपि तावद् सरलं न इति ।

सरलसंस्कृतद्वारा एव ये संस्कृताभ्यासं कृतवन्तः, ये च अभ्यासं कुर्वन्तः सन्ति - तयोः द्वयोः अपि सरलसंस्कृतं सरलमेव । परन्तु कृतप्रौढसंस्कृताभ्यासैः आरम्भे तदर्थं कश्चन परिश्रमः एव कर्तव्यः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भवति ! सरलतरसंस्कृतस्य कृते अधिकतरः प्रयासः कर्तव्यः !! सरलतमाय संस्कृताय महत्तमप्रयत्नः करणीयः !!!

पूर्वं तादृशः कालः आसीत् यत् वैदुष्यपूर्णभाषया, प्रौढभाषया, दुरवगम्यभाषया कृतिरचना, भाषणं वा पाण्डित्यस्य निकषः आसीत् । परन्तु अद्य तादृशः समयः आगतः अस्ति यत्र सरलसंस्कृतं पाण्डित्यस्य अपरः निकषः !

वदतु संस्कृतम् । सरलसंस्कृतम् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं स्युः संस्कृतच्छात्राः

६

पञ्चदशवर्षेभ्यः पूर्वं नरेन्द्रः* नाम कश्चन प्रतिभावान् संस्कृतच्छात्रः आसीत् । पारम्परिकपद्धत्या संस्कृतस्य अध्ययनेन सह सः सन्ध्याकालिकविद्यालये B.A. (English) अपि पठति स्म । उभयविद्ययोः स्नातकपरीक्षानन्तरं सः कदाचित् स्वस्य भगिन्याः गृहे संस्कृतकार्यकर्त्रा मोहनेन* मिलितवान् । तदा मोहनः नरेन्द्रम् उद्दिश्य पृष्टवान् - "नरेन्द्र ! भवान् स्नातकोत्तरकक्ष्यायां वेदान्तं स्वीकरिष्यति, उत साहित्यम् ?"

नरेन्द्रः उक्तवान् - "नैव, अहं तु English M.A. करिष्यामि ।"

"कथं भवान् संस्कृतं परित्यजति ?"

"परित्यागः नैव । पूर्वं तु दिने संस्कृतविद्यालये पठन् सायं B.A. पठामि स्म । इदानीं दिने English M.A. पठन् बाह्यच्छात्ररूपेण संस्कृतपरीक्षां स्वीकरिष्यामि । पठनं तु उभयविधमपि करिष्यामि ।"

"M.A.कृत्वा किं करिष्यति भवान् ?"

"आङ्ग्लप्राध्यापकः भविष्यामि ।"

"तर्हि संस्कृतस्य परित्यागः एव अभवत् खलु ?"

"एकया दृष्ट्या तथैव इति वक्तुं शक्यते । परन्तु किं करोमि ? संस्कृतविद्यालये पाठनं सम्यक् न भवति । पठनानन्तरम् उपजीविकायै कार्यमपि न लभ्यते । समाजे आदरः अपि नास्ति । इङ्ग्लीष् पठामि चेत् ....."

"समस्याः शतं स्युः, सहस्रं वा स्युः । अस्माभिः तु परिहारः अन्वेष्टव्यः । वयं स्मः समस्यायाः उत्तरदानाय, न तु पलायनाय । जीवनं

---

* परिवर्तितं नाम

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चेदपि, मरणं चेदपि, उभयमपि संस्कृतक्षेत्रे एव, अत्रैव ।''

''परन्तु अहं .....''

आरात्रि तयोः मध्ये वादः जातः । अद्यापि बहूनां संस्कृतच्छात्राणां मनसि जायमानः एव अस्ति । 'किमर्थम् अहं संस्कृतं पठितुम् आगतवान् ? अग्रे मम भविष्यं किम् ? किं कार्यं/सेवाम्/उद्योगं प्राप्नुयाम् ? अध्यापन-वृत्तिं विना अन्यः जीवनमार्गः क्व ?' इत्येवं चिन्तयन्तः संस्कृतच्छात्राः हताशाः, नष्टोत्साहाः, निराशाः, निस्तेजस्काः च सन्तः इच्छया अनिच्छया वा संस्कृतं पठन्तः सन्ति ।

मानसिकतायाः मूलम्

संस्कृतच्छात्रान् केवलं वयं कथं दूषयेम ?

समग्रस्य हिन्दुसमाजस्य यः रोगः अस्ति सः रोगः तस्यैव समाजस्य अङ्गभूतस्य संस्कृतच्छात्रगणस्य अपि आगतः अस्ति । संस्कृतशिक्षकाणां या मानसिकता अस्ति सा एव संस्कृतच्छात्रेषु अपि सङ्क्रामति ।

१९८२तमे वर्षे कश्चन छात्रः यः दशमकक्ष्यायां ८६% अङ्कान् प्राप्तवान् आसीत्, अपि च यः अभियान्त्रिकमहाविद्यालये वैद्यकीयमहाविद्यालये च प्रवेशं प्राप्तवान् आसीत् तादृशः सः तत्सर्वं परित्यज्य तिरुपतिविद्यापीठे प्राक्शास्त्रिकक्ष्यां प्रविष्टवान् आसीत् । तदा तस्य विद्यापीठस्य तदानीन्तनाः अधिकांशाः आचार्याः – ''किमर्थं भवान् अत्र आगतवान् ? एतत्पठनेन कः लाभः ?'' इत्यादिकम् उपदिशन्ति स्म । तादृशे वातावरणे छात्राणां का प्रेरणा भवेत् ?

संस्कृतस्य वर्तमानस्थितिविषये चर्चासमये संस्कृतशिक्षकाः वदन्ति यत् 'अद्यत्वे ये छात्राः आगच्छन्ति तेषां संस्कृते रुचिः नास्ति । अन्यत्र विज्ञानवाणिज्यादिशाखासु अप्राप्तप्रवेशाः ते संस्कृतशालाः संस्कृतविभागान् वा प्रविशन्ति । ते कक्ष्याः न आगच्छन्ति' इत्यादिकम् । छात्राः वदन्ति यत् – 'आचार्याः नैव पाठयन्ति । भवन्तः एव स्वयं पठन्तु इति वदन्ति, विरामं यच्छन्ति' इत्यादिकम् । तर्हि कुत्र सत्यम् अस्ति ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किञ्चित् सत्यं सर्वैः संस्कृतानुरागिभिः अवगन्तव्यं यत् अद्यतनसंस्कृतच्छात्राणां मानसिकता एव श्वस्तनं संस्कृतस्य भविष्यम् । अतः एव एतस्मिन् लेखे संस्कृतच्छात्रेषु विशेषनिवेदनम् । अद्य संस्कृतच्छात्राणां विषये ये ये आक्षेपाः सन्ति तानि सत्यानि, असत्यानि, आंशिकसत्यानि अन्यविधानि वा स्युः । अस्माभिः संस्कृतच्छात्रैः अस्माकं कृत्याः द्वारा एव उत्तरं दातव्यम्, आक्षेपाणां परिमार्जनं करणीयम् ।

उभयत्रापि अपेक्ष्यते परिष्कारः

संस्कृतच्छात्रेषु धाराद्वयम् । शास्त्रि-आचार्य-विद्वत्-शिरोमणि-प्रभृतिषु पारम्परिककक्ष्यासु पठन्तः छात्राः, बी.ए., एम्.ए. प्रभृतीनाम् आधुनिक-उपाधीनां निमित्तं पठन्तः छात्राः चेति । पूर्वतनानाम् आधुनिकज्ञानं नास्तीति आक्षेपः । द्वितीयगणीयानां तु संस्कृतज्ञानं न भवतीति आरोपः ।

पारम्परिकपाठशालासु पठितृभिः छात्रैः आधुनिकजगतः परिचयः सम्पादनीयः । समाचारपत्रपत्रिकादयः पठनीयाः । यदि विज्ञान-वाणिज्य-तन्त्रज्ञान-उद्योगादिषु क्षेत्रेषु वर्तमानप्रगतीनां परिचयः अस्माकं न भवति तर्हि देशं कालं च अवगन्तुं न शक्नुमः । जनैः सह मेलितुं, वार्तालापं कर्तुं च न शक्नुमः । ग्रामजनः कश्चित् विमानयानस्य 'कॉक्पिट्' इत्यस्मिन् उपवेशितः चेत् यथा भवेत् तथा अस्माकं संस्कृतच्छात्राणां स्थितिः भवेत् । न्यूनातिन्यूनं E-mail, WWW इत्यादीन् वर्तमानपारिभाषिक-शब्दान् वा जानीयाम । तदा एव आत्मविश्वासः भवति । G.K. इति कथ्यमानं सामान्यज्ञानम् अस्माकं सुष्ठु भवेत् ।

संस्कृतेन बी.ए., एम्.ए. - इत्यादिकं ये पठन्ति तेषां पाठ्यक्रमे संस्कृतवाङ्मयस्य विषयभागः अधिकः अस्ति, भाषाभ्यासभागः न्यूनः अस्ति इति कारणतः तैः भाषाभ्यासविषये अधिकः प्रयत्नः करणीयः । न चेत् संस्कृतसम्बन्धे एम्.ए. भवेत्, न तु संस्कृते एम्.ए. । धाराद्वयस्य अपि छात्रैः संस्कृतभाषायाः प्रयोगस्य अभ्यासः अधिकतया करणीयः । वर्तमानशिक्षणे तावत् आंग्लभाषामाध्यमेन प्रादेशिकभाषामाध्यमेन वा संस्कृतपाठः भवति । परीक्षायाम् उत्तरलेखनमपि अन्यभाषया भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अतः छात्राणां संस्कृतस्य प्रयोगसामर्थ्यं न भवति । एतेन छात्राणां महती हानिः भवति । अतः छात्रैः एव संस्कृतमाध्यमेन पाठनविषये आग्रहः करणीयः ।

संस्कृतच्छात्राणां दृष्टिः केवलम् उपाधिप्राप्तौ न स्यात् । भाषायाः, स्वीकृतस्य शास्त्रस्य च तलस्पर्शिज्ञानं यथा भवेत् तथा परिश्रमः करणीयः । शास्त्रपरम्परा क्षीयमाणा अस्ति । तस्याः रक्षणस्य उत्तरदायित्वम् अस्माकमेव । एकैकः अपि छात्रः किमप्येकं शास्त्रं चित्वा अध्ययनाध्यापनादिमाध्यमेन तस्य शास्त्रस्य संरक्षणं जीवनकार्यरूपेण स्वीकुर्यात् ।

कार्यसाधकाः उपायाः

भाषायाः सुष्ठु अभ्यासाय अधोलिखिताः दश उपायाः लाभाय भवेयुः ।

१. प्रथमं तावत् निरन्तरं संस्कृतेन सम्भाषणम् । संस्कृतेन सम्भाषणं संस्कृतच्छात्राणाम् अभिज्ञानं भवेत् ।

२. शब्दरूपाणां, धातुरूपाणाम्, उत्तमश्लोकानां च कण्ठस्थीकरणं महते लाभाय भवति । मासद्वयं यावत् प्रातः प्रतिदिनम् एकवारम् उच्चैः पठति चेत् सर्वं कण्ठस्थं भवति ।

३. भाषायां प्रभुत्वसम्पादनाय व्याकरणं संस्कृतव्याख्यानसहितं काव्यं च पठनीयम् ।

४. नाटकानि, रूपकाणि, गद्यकाव्यानि, आधुनिकगद्यानि कथाः वा पठामः चेद् भाषाग्रहणं शीघ्रं भवति ।

५. धातु-कृदन्त-विशेषणादिशब्दानां सङ्ग्रहशीलता ।

६. वार्तानां कथानां वा मातृभाषातः संस्कृतभाषया प्रतिदिनम् अनुवादाभ्यासः ।

७. स्वतन्त्रतया संस्कृतेन लेखनम् । (अनूदितस्य लिखितस्य च ज्येष्ठानां द्वारा परिष्कारः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

८. संस्कृतेन चिन्तनम् ।

९. संस्कृतेन पाठानां टिप्पणीसज्जीकरणम् ।

१०. सरलसंस्कृतस्य अभ्यासः ।

अद्य बहवः संस्कृतशिक्षकाः वदन्ति यत् - 'छात्रदशायां संस्कृतं कथम् अभ्यसनीयमिति अस्माकं योग्यमार्गदर्शनं नासीत् । तदा संस्कृतं सम्यक् न अधीतमिति अद्य खेदः भवति' इति । अतः अद्यतनैः छात्रैः चिन्तनीयं यत् यथा अस्माकम् अग्रे खेदः न भवेत् तथा भाषायां प्रभुत्वसम्पादनाय अद्य महान् प्रयत्नः करणीयः । संस्कृतेन सम्भाषणं पठनं लेखनमिति त्रयमपि बहुप्रमाणेन करणीयम् । एतेन सह एकैकोऽपि छात्रः कनीयांसं छात्रं कञ्चित् प्रतिदिनं पाठयेत् । तदा तदीयं ज्ञानं स्पष्टतरं दृढं च भवति ।

संस्कृतच्छात्राणां स्वशास्त्रस्य गभीरं ज्ञानम्, इतरेषां सर्वेषां शास्त्राणां सामान्यपरिचयः च भवेत् । ते सम्यक् संस्कृतवाङ्मयेतिहासं जानीयुः ।

सिद्धान्तकौमुदीं मल्लिनाथव्याख्यानसहितं महाकाव्यमेकं च यः सम्पूर्णतया पठिष्यति तस्य भाषा स्वाधीना भविष्यति ।

भासनाटकचक्रं, श्रीमतः रमेशचन्द्रशुक्लस्य प्रबन्धरत्नाकरः इत्यादीनि पुस्तकानि, 'सम्भाषणसन्देशः' च उत्तमं पठनसाहित्यम् । तेषां प्रतिदिनं पठनं करणीयम् । पठनसमये लभ्यमानानां नूतनशब्दानाम् अर्थाः शब्दकोशसाहाय्येन ज्ञातव्याः, टिप्पणीपुस्तके लेखनीयाः च ।

संस्कृतवाङ्मये विज्ञानतन्त्रज्ञानसम्बन्धिविषयाः बहवः सन्ति इति सर्वैः विदितमेव । परन्तु समस्या एषा अस्ति यत् संस्कृतज्ञाः विज्ञानं न जानन्ति, वैज्ञानिकाः संस्कृतं न जानन्ति । एतादृशस्थितौ प्राचीन-अर्वाचीन-ज्ञानयोः सङ्गमनाय संस्कृतच्छात्रैः आधुनिकविषयाणामपि अध्ययनं करणीयम् । जगतः वर्तमानप्रगतेः विषयाः, समकालिकाः विचाराः चेति सर्वे संस्कृतवाङ्मये भवेयुः ।

तादृशकृतिनिर्माणार्थम् अपि संस्कृतच्छात्रैः समकालिकविषयाणाम् अध्ययनं करणीयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किम् आङ्ग्लविरोधेन ?

अस्मासु अधिकांश-संस्कृतज्ञाः आङ्ग्लभाषायाः विरोधं कुर्वन्ति । परन्तु ते एव वयं समाजे इतरैः यदा आङ्ग्लभाषा प्रयुज्यते तदा तस्य अर्थं न अवगच्छामः इति वदन्तः आत्महीनभावनाम् अनुभवामः । वयं स्वयं तां भाषां ज्ञात्वा पश्चात् यदि तस्याः विरोधं कुर्मः तर्हि अस्माकं वचनस्य महत्त्वम् अधिकं भवति । न चेत् अन्यः अर्थः गृह्यते । भारते शिक्षायाः माध्यमभाषा भारतीयभाषा भवेत्, प्रशासनस्य भाषा अपि भारतीयभाषा एव भवेत् इत्यत्र विप्रतिपत्तिः नास्ति । परन्तु अद्य 'इण्टरनेट्'क्रान्तिकारणतः आंग्लभाषा सर्वत्र प्रसरन्ती अस्ति । उपदशवर्षाभ्यन्तरे इण्टरनेट्क्रान्तिकारणतः आङ्ग्लभाषा प्रबलतमं संवहनमाध्यमं भविष्यति । एतं परिवर्तमानं कालम् अवगत्य वयं संस्कृतज्ञाः आङ्ग्लयुगे संस्कृतं प्रतिष्ठापयितुम् आङ्ग्लभाषामपि अवश्यमेव पठेम, सम्यगेव पठेम । आगमिष्यतः आङ्ग्लप्रवाहस्य सम्मुखी- करणाय, तस्य निवारणाय एव अस्माभिः सर्वैः आङ्ग्लभाषायामपि प्रभुत्वं सम्पादनीयम् ।

भवतु सङ्गणकाभ्यासः

भारते अपि कम्प्यूटर्क्रान्तिः आरब्धा अस्ति । केन्द्रशासनस्य योजनानुसारम् अग्रिमपञ्चवर्षेषु देशे ७५,००० विद्यालयेषु कम्प्यूटर्यन्त्राणि भविष्यन्ति । पञ्चाशद्वर्षेभ्यः पूर्वं गृहे गृहे रेडियोयन्त्रम् आगतम् । पश्चात् ध्वनिमुद्रणयन्त्रम् आगतम्, पश्चात् दूरदर्शनम् आगतं, तदनु दूरभाषा आगता, वर्णदूरदर्शनम् आगतम्, वीडियो आगतम् । इदानीं कम्प्यूटर् आगच्छत् अस्ति, इण्टरनेट् आगच्छत् अस्ति । सद्यः एव कम्प्यूटर्-टि.वि.-दूरभाषादिकं सर्वम् एकस्मिन् एव यन्त्रे भविष्यति । दशवर्षाभ्यन्तरे भारते सर्वे अपि स्वकम्प्यूटर्यन्त्रद्वारा (इण्टरनेट्द्वारा) वार्तालापरूपेण, पत्रव्यवहारं करिष्यन्ति ! एतादृशवेगेन कम्प्यूटर्क्रान्तिः जायमाना अस्ति । अतः एतस्यां धावनस्पर्धायां विजयं प्राप्तुं सर्वे संस्कृतच्छात्राः इदानीमेव कम्प्यूटरशिक्षणस्य आरम्भं कुर्युः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किञ्च, बहुत्र संस्कृतविद्यालयं, संस्कृतच्छात्रावासं वा गत्वा पश्यतु । सर्वा अपि भित्तिः ताम्बूलरससिञ्चनेन शोभिता दृश्यते । किम् एषा एव सा संस्कृतिः, या संस्कृतभाषाद्वारा सञ्जीवयिष्यते ? स्वच्छताविषये अस्माकम् इतोऽप्यधिकं प्राशस्त्यं भवेत् ।

संस्कृतच्छात्रः अध्ययनानन्तरं शिक्षकः भवति चेद् सर्वोत्तममेव । परन्तु केवलं शिक्षकः एव भवेयमिति किमर्थं सः चिन्तयेत् ? IAS, IPS प्रभृतीः परीक्षाः लक्ष्यीकरोतु नाम सः । विधिकक्ष्यां वा प्रविशतु । कम्प्यूटर्क्षेत्रं प्रविशतु । वाणिज्यं वा करोतु । आपणं स्थापयतु वा । कृषिं वा करोतु । लघु-उद्योगं वा करोतु । पौरुषचिन्तनं कुर्वतः छात्रस्य पुरतः सहस्रं मार्गाः सन्ति ।

स्वाधीनाः वयम्...

वयम् एतं विषयम् अङ्गीकुर्मः यत् शासनेन संस्कृतार्थं बहु किमपि करणीयमस्ति इति । संस्कृतशिक्षकैः अपि करणीयमस्ति । परन्तु ते अस्मच्छात्राधीनाः न सन्ति । वयं छात्राः तु अस्मदधीनाः, स्वाधीनाः च स्मः । अतः वयम् अस्माकं कर्तव्यं चिन्तयामः । संस्कृतभाषायाः, वेदशास्त्रादिज्ञानभाण्डारस्य च संरक्षणसंवर्धनोत्तरदायित्वं यूनाम् अस्माकम् । अतः अस्माभिः प्रकृतं बहु सम्यक् अध्ययनं करणीयम् । ज्ञानधारणं विना, प्रमाणपत्रमात्रधारिणाम् अस्माकम् इतरान् निर्दिश्य वक्तुम् अधिकारः न भवति । अतः 'ज्ञानमुपास्व ! बलमुपास्व !'

संस्कृतच्छात्राः वयं संघटिताः भवेम । संस्कृतोज्जीवने युवशक्तेः उपयोगः भवेत् । परदूषणम्, अभावात्मकभाषणं च परित्यज्य वयं क्रियाशीलाः, चैतन्यशीलाः च भवेम । उत्साहेन, चातुर्येण, कर्तृत्वेन, गतिशीलतया च वयं संस्कृतक्षेत्रे विद्यमानां व्यवहारविमुखताम् अकर्मण्यतां च निवारयेम । संस्कृतविद्यालये पठनानुकूलवातावरणनिर्माणं कुर्याम । सर्वस्मिन् संस्कृतच्छात्रे ध्येयवादस्य जागरणं कुर्याम ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दातव्यः समयः

संस्कृतक्षेत्रे परिवर्तनस्य आनेतारः के ? राजनीतिज्ञेभ्यः अपेक्षां कर्तुं न शक्नुमः, न वा समाजतः । परिवर्तनाय प्रथमं संस्कृतज्ञाः सज्जाः भवेयुः । संस्कृतज्ञानां चिन्तने, व्यवहारे, जीवने च यदा परिवर्तनं भविष्यति तदा राष्ट्रजीवने अपि संस्कृतस्य पुनः प्रतिष्ठापनं भविष्यति । एतादृशं परिवर्तनं साधयितुं युवानः संस्कृतज्ञाः एव शक्नुयुः । संस्कृतच्छात्राः अद्य पठनेन सह संस्कृतसम्भाषणशिबिराणि चालयेयुः । तदर्थं समयं दद्युः । सायङ्काले समाजमध्ये विविधस्थानेषु संस्कृतसम्भाषणशिबिराणि चालयेयुः । तदर्थं समयं दद्युः । विरामदिनेषु अन्यस्थानानि गत्वा शिबिराणि चालयेयुः । भारते लक्षाधिकाः संस्कृतप्रधानच्छात्राः सन्ति । ते यदि मासद्वयस्य विरामकालं संस्कृताय यच्छन्ति तर्हि लक्षाधिकस्थानेषु संस्कृतानुकूल-वायुमण्डलनिर्माणं कर्तुं शक्नुमः । कोट्यधिकजनानां संस्कृतसम्भाषण-पाठनं कर्तुं शक्नुमः ।

यथा वैद्यकीयविद्याभ्यासानन्तरम् एकं वर्षं यावत् तेन वैद्यकीयच्छात्रेण चिकित्सालये अनिवार्यतया सेवाकार्यं करणीयं, तदनन्तरमेव तस्मै प्रमाणपत्रं दीयते, तथैव सर्वेण अपि संस्कृतच्छात्रेण एकं वर्षं यावत् संस्कृतप्रचारकार्याय समयः दातव्यः । जीवने संस्कृताय एकस्य वर्षस्य त्यागः करणीयः । केवलं मञ्चे स्थित्वा भाषणैः, सुखासन्दे उपविश्य चायपानसमये भाषणेन वा परिवर्तनं नागमिष्यति । तदर्थं श्रमः करणीयः, समयः दातव्यः, जीवनस्य कश्चन भागः दातव्यः च । संस्कृतक्षेत्रे एकवर्षसमयसमर्पणस्य नूतनः आदर्शः नूतना परम्परा च उपस्थापनीया ।

सेवां कर्तुम् अवसरः

केभ्यश्चित् वर्षेभ्यः पूर्वम् एकस्मिन् संस्कृतविद्यालये तत्रत्याः छात्राः पृष्टाः – ''भवन्तः केन प्रकारेण अत्र संस्कृतविद्याभ्यासं प्रति आगतवन्तः ?'' इति ।

तदा एकः उक्तवान् – 'मम पिता सूचितवान्, अतः आगतवान् ।'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्यः उक्तवान् – 'मम ग्रामस्थः अत्र छात्रः आसीत्, तस्य

कथनानुसारम् आगतवान् ।'

अपरः उक्तवान् - 'अन्यत्र प्रवेशः न लब्धः, अतः' इति ।

पुनरेकः उक्तवान् - 'अत्र छात्रावासव्यवस्था अस्तीति अत्र आगतः' इति ।

अधिकांशाः छात्राः उक्तवन्तः - 'अकस्मात्, योगायोगेन वा वयं संस्कृतशिक्षणं प्रति आगतवन्तः' इति ।

परन्तु तेषु केचन एतादृशाः अपि आसन्, यत् ते एवं चिन्तयन्ति स्म यत् - ''वयं योगायोगेन संस्कृतक्षेत्रं नागतवन्तः, एकं महत् कार्यं साधयितुं भगवता प्रेषिताः । ईश्वरीयकार्यम् ऐतिहासिककार्यं साधयितुं भगवता चिताः'' इति । वस्तुतः सर्वे वर्तमानसंस्कृतच्छात्राः पुण्यशालिनः, संस्कृतोज्जीवनरूपे ऐतिहासिककार्ये स्वीयां सेवां समर्पयितुम् अवसरं प्राप्तवन्तः च सन्ति ।

मम जीवनं संस्कृताधीनम्

संस्कृतज्ञानाम् अस्माकं पूर्वजानां चिन्तनम् आसीत् - 'न दैन्यं, न पलायनम्' इति । अद्यापि अस्माकं तदेव चिन्तनं भवेत् । यावन्ति अपि कष्टानि स्युः, अचलाः सन्तः, अत्रैव स्थित्वा संस्कृतस्य नवोत्थानाय रक्तं स्वेदं कृत्वा कार्यं करवाम । 'मम भविष्यं संस्कृताधीनं भवतु, संस्कृतस्य भविष्यं मदधीनम् अस्ति' इति चिन्तयन्तः वयं संस्कृतार्थं स्वीयां प्रतिभां समयं च समर्पयाम । 'संस्कृतस्य अवमाननं मम अवमाननम्, संस्कृतस्य उत्कर्षः एव मम उत्कर्षः' इति अस्माकं श्रद्धा भवतु ।

संस्कृतच्छात्राः वयम् अस्माकं गुरुजनेषु श्रद्धां कुर्मः । पठने मतिं कुर्मः । संस्कृतसम्भाषणे प्रयत्नं कुर्मः । संस्कृतभाषां व्यवहारपथे आनेतुं परिश्रमं कुर्मः ।

संस्कृतेन सम्भाषणम् इत्येतत् संस्कृतस्य सञ्जीवनम् अस्ति । अतः संस्कृतेन प्रेम्णा, आनन्देन, अभिमानेन च सम्भाषणं कुर्मः । अन्ये आङ्ग्लभाषया सम्भाषणं गर्वस्य विषयं मन्यन्तां नाम, वयं तु संस्कृतेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्भाषणं गर्वस्य विषयः इति स्वीकुर्मः । सर्वत्र, सर्वदा, सर्वैः सह, समग्रमपि संस्कृतेन वदामः । संस्कृतच्छात्राणाम् अस्माकम् अभिज्ञानमेव संस्कृतसम्भाषणेन भवेत् । तथा तावन्मात्रेण संस्कृतसम्भाषणं करणीयम् ।

संस्कृतमाता प्रतीक्षमाणा अस्ति - संस्कृतार्थम् अस्वस्थहृदयानां कृते । संस्कृतमाता प्रतीक्षमाणा अस्ति - संस्कृतसम्भाषणज्वरपीडितानां कृते । सा प्रतीक्षमाणा अस्ति - संस्कृतप्रचारकार्योन्मत्तयुवकयुवतीनां कृते !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गन्तव्यः मार्गः

७

भारते बहुभ्यः दशकेभ्यः 'संस्कृतं व्यवहारभाषा भवेत्', 'शिक्षायां संस्कृतस्य अनिवार्यस्थानं भवेत्', 'संस्कृतं भारतस्य सम्पर्कभाषा भवेत्' - इत्यादयः अभियाचनाः (demands) आसन् अस्माकं संस्कृतज्ञानाम् । अपि च केन्द्रशासनं राज्यशासनानि च एताः अपेक्षाः साकारीकुर्युः इति प्रतीक्षामपि कृतवन्तः ते । परन्तु तथा नाभवत् । अतः वयम् अत्यन्तं सहजतया संस्कृतस्य अपेक्षितविकासस्य अभावे शासनं दूषयामः, राजनैतिकनेतॄन् दूषयामः, समाजं च दूषयामः । यद्यपि ते अपि तत्र कारणीभूताः सन्ति, तथापि आत्मनिरीक्षणात्मकं चिन्तनं क्रियते चेत् ततोऽपि प्रमुखानि अन्यानि कतिचन कारणानि दृष्टिगोचराणि भवन्ति ।

राजनैतिक-इच्छाशक्तेः अभावः

वस्तुतः प्रजातान्त्रिकं शासनं जनानां सामूहिकचिन्तनस्य प्रतिबिम्बनं करोति । अद्य समाजस्य बहुभागजनानां अन्तरङ्गे संस्कृतविषयकं समर्थनं न जागरितम् अस्ति । अतः संस्कृतं राजनैतिकनेतॄणां चिन्तनविषयः अद्य नास्ति । समाप्तायाः दशमलोकसभायाः कालावधौ राष्ट्रपतिः संस्कृतज्ञः आसीत्, प्रधानमन्त्री संस्कृतज्ञः आसीत्, संस्कृतेन शपथग्रहणं कृतवन्तः आसन् १०% सांसदाः, अन्ये च संस्कृतानुरागिणः सांसदाः बहवः आसन् । परन्तु ते संस्कृतार्थं न तादृशं किमपि कृतवन्तः । (ते न केवलं संस्कृताय किमपि न कृतवन्तः, अपि तु केन्द्रीयमाध्यमिकशिक्षामण्डल्याः पाठ्यक्रमे विदेशीयभाषाणाम् आवल्यां संस्कृतं योजितवन्तः !) किं कारणम् ? राजनैतिक-इच्छाशक्तेः (Political Will) अभावः । अपि च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अल्पसंख्याकतुष्टीकरणनीतिः । आङ्ग्लभाषायाः प्रोत्साहनेन क्रैस्तवानां मतानि लभ्यन्ते, उर्दूभाषाप्रोत्साहनेन महम्मदीयानां मतानि लभ्यन्ते । संस्कृतप्रोत्साहनेन मतलाभः कः ?

एवमादिना शासनस्य राजनैतिकनेतॄणां वा दूषणं कृत्वा वयं दोषस्य उत्तरदायित्वं समाजस्य इतरेषु आरोपयितुं वा, स्वस्कन्धतः अपसारयितुं वा न शक्नुमः । एतद्विषये अस्मदीयानां, तन्नाम संस्कृतज्ञानां, संस्कृताभिमानिनां च प्रयत्नः कीदृशः, कियान् च आसीत् इति एतदपि द्रष्टव्यम् । किं वयं सभासु सम्मेलनेषु च 'संस्कृतार्थं वयं किं कुर्याम' इति कार्ययोजनाम् अकृत्वा शासनेन 'एतद् करणीयम्, तद् करणीयम्' इति अभियाचनामात्रं कुर्वन्तः कालं न यापितवन्तः ? किं वयं संस्कृतोन्नयनाय परमुखप्रेक्षिणः एव नास्म ?

विकासाय प्रयत्नद्वयम्

प्राचीने भारते संस्कृतस्य राजाश्रयः आसीत् । परन्तु संस्कृतज्ञैः ज्ञानार्जनाय ज्ञानप्रसाराय वा राजावलम्बनं कृतम् । अद्य संस्कृतस्य विकासः भवेत् इत्युक्ते तदर्थं प्रयत्नद्वयम् आवश्यकम् ।

१. शासनद्वारा संस्कृतस्य अनिवार्यरूपेण शिक्षणम्, संस्कृतस्य संस्कृतमाध्यमेन पाठनं परीक्षालेखनं च, संस्कृताध्ययनस्य संस्कृतोपयोगस्य च प्रोत्साहनाय विविधाः उपक्रमाः - इति कार्यत्रयं भवेत् ।
२. समाजे स्वयंसेविसंस्थानां (Non-Government Organisations) द्वारा जनमानसे संस्कृतसम्बन्धे अनुकूलभावनिर्माणार्थं कार्यक्रमाः, नगरे नगरे, ग्रामे ग्रामे लाभोद्देशेन विना संस्कृतशिक्षणाय समर्पितचित्तानां शिक्षकाणां गणरचनं, पुस्तक-ध्वनिमुद्रिका-वीडियो-आदि - नानाविधपाठनसाहित्यप्रकाशनम्, समग्रे देशे व्यापकरूपेण स्थाने स्थाने, कोणे कोणे च संस्कृतकक्ष्याणाम् आयोजनम् - इति चत्वारि कार्याणि भवेयुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

करणीयः शक्तिसञ्चयः

विचारः यावान् अपि उत्तमः अस्ति चेदपि तस्य विचारस्य पृष्ठतः शक्तिः नास्ति चेत् तं विचारं कोऽपि न शृणोति । शक्तिसञ्चयं विना अभियाचनाकरणम् अस्माकं व्यर्थप्रलपनमात्रं भवेत् । अतः अस्माभिः संस्कृताय शक्तिः - जनशक्तिः - सम्पादनीया । जनशक्तिनिर्माणाय, प्रबलजनसमर्थनसम्पादनाय समाजे तादृशं जनान्दोलनम् उपस्थापयितुं ध्येयवादिकार्यकर्तॄणां राष्ट्रव्यापिगणः अपेक्षितः । तादृशगणस्य तादृशकार्यकर्तृशक्तेः च निर्माणपर्यन्तं शासनसमीपे अभियाचना-करणापेक्षया कार्यकर्तृनिर्माणात्मक-कार्यक्रमाणां विषये अधिकं ध्यानं दातव्यम् । तदर्थं मौनम् उग्रा दीर्घा च तपश्चर्या कर्तव्या ।

कतिचन कार्याणि साधयितुं शासनस्य इत्युक्ते राजनीतिज्ञानां कृपा न आवश्यकी । वयं संस्कृतज्ञाः एव तानि साधयितुं शक्नुयाम । उदाहरणं यथा - संस्कृतस्य संस्कृतभाषामाध्यमेन एव पाठनविषये, परीक्षायाम् उत्तरलेखनविषये च राजनीतिज्ञाः मन्त्रिणः वा निर्णयं न कुर्वन्ति । संस्कृतशिक्षकाणां समूहाभिप्रायः एव परीक्षामण्डल्याः पाठ्यपुस्तक-समित्याः च अभिप्रायः भवति, यतः तासु मण्डलीषु समितिषु च संस्कृतशिक्षकाः एव प्रतिनिधयः भवन्ति । काल्पनिकं चिन्तनम् एकं करोतु यत् 'अग्रिमवर्षे भारते प्राथमिक-महाविद्यालय-विश्वविद्यालयस्तरेषु विद्यमानाः सर्वे संस्कृतशिक्षकाः संस्कृतं संस्कृतमाध्यमेन पाठयिष्यन्ति' इति । (तद् असाध्यं नैव, अत्यन्तं सुलभसाध्यं, यतः वर्षारम्भे सेतुपाठक(Bridge Course) रूपेण संस्कृतसम्भाषणं पाठ्यते चेत् पश्चात् आवर्षं संस्कृतमाध्यमं शक्यम्) तर्हि एकवर्षाभ्यन्तरे ८० लक्षच्छात्राः संस्कृतसम्भाषणसमर्थाः भविष्यन्ति (यतः देशे तावन्तः च्छात्राः संस्कृतं पठन्तः सन्ति) । भारतस्य जनसंख्यायाः एकप्रतिशतं जनाः ! एवं संस्कृतशिक्षकाः मनः कुर्वन्ति चेत् अल्पेन कालेन एव महत् साधयितुं शक्नुयुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जनमानसपरिवर्तनम्

वयं संस्कृतज्ञाः अभिमानिनः वा 'संस्कृतं भारतस्य सम्पर्कभाषा भवेत्' इति सभासु भाषणेषु अभियाचनां कुर्मः । तादृशानां संस्कृतज्ञानाम् एकस्मिन् समूहे अहं प्रश्नमेकं कृतवान् - ''भवन्तः अद्य स्वगृहं गत्वा 'अद्य आरभ्य अस्माकं गृहे सर्वेषाम् अस्माकं सम्पर्कभाषा संस्कृतम्' इति वदन्ति चेत् कति जनानां गृहे अङ्गीकारः भवेत्, तादृशाः स्वहस्तम् उत्तोलयन्तु'' इति । कोऽपि न उत्तोलितवान् । तर्हि यदा अस्माकं गृहे एव अङ्गीकारः न भवति तदा देशे कथं भवेत् ? वयं सामान्यतः कमपि जनम् एकं विषयम् अङ्गीकारयितुम् इच्छामः चेत् प्रथमं तदर्थं तस्य मानसिकतां सज्जीकृत्य पश्चात् योग्यं समयं सन्निवेशं च दृष्ट्वा तं वदामः । तदा स्वीकृतिः भवति । मम कथनस्य तात्पर्यम् एतदस्ति यत् देशे संस्कृतानुकूल-मानसिकतानिर्माणं कृत्वा सार्वत्रिक-जनसमर्थनशक्तियुक्ताः सन्तः वयं मुखम् उद्घाटयेम । इदानीं तु जनाः 'संस्कृतं सम्पर्कमाध्यमं भवितुम् अर्हति' इत्यस्य शक्यतायाः (feasibility) एव प्रश्नं कुर्युः । तत्सम्बन्धे देशमानसपरिवर्तनं कर्तव्यं चेदपि शासनस्य कृपा न आवश्यकी । संस्कृतज्ञाः एव शक्नुवन्ति । ते यदि स्वगृहं संस्कृतगृहं कुर्वन्ति तर्हि वर्षाभ्यन्तरे देशे दशलक्षगृहाणि संस्कृतगृहाणि भविष्यन्ति । तदा संस्कृतस्य कीदृशम् अद्भुतं नयनमनोहरं सुन्दरं चित्रं निर्मितं स्यात् !

एवं संस्कृतज्ञाः वयं स्वावलम्बनस्य, स्वाभिमानस्य, च मार्गम् अनुसरेम । व्यवहारकुशलतायाः, कर्तृत्वदर्शनस्य च मार्गम् अनुसरेम । त्यागस्य, परिश्रमस्य, पराक्रमस्य च मार्गम् अनुसरेम ।

ज्ञातव्यं रोगनिदानम्

यदि कश्चन रोगी अस्ति, तस्य रोगनिदानं (diagnosis) सम्यक् न ज्ञातं तर्हि यावतः, यादृशस्य वा औषधस्य दानेन अपि रोगस्य निवारणमेव न भवेत् । तथैव संस्कृतक्षेत्रे याः समस्याः सन्ति तासां मूलं कारणं अस्माभिः ज्ञातं चेदेव वयं तदुचितान् कार्यक्रमान् स्वीकर्तुं, कार्ययोजनां च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्तुं शक्नुयाम, अपेक्षितं परिवर्तनं साधयितुं शक्नुयाम ।

भारते संस्कृतस्य अभिमानिगणः बहुविशालः अस्ति । परन्तु ते सर्वे संस्कृतं न पठन्ति । किमर्थम् ? तेषु संस्कृतविषये आदरः, 'संस्कृतम् आवश्यकम्' इति भावना अस्ति चेदपि संस्कृतपठने ते न प्रवर्तन्ते, किमर्थम् ? तर्हि केचन पठन्ति चेत् किमर्थं पठन्ति, न पठन्ति चेत् किमर्थं न - इति अस्माभिः चिन्तनीयम् ।

संस्कृतपठितॄणाम् उद्देशाः प्रायः एते सन्ति - केचन वेदोपनिषदः, भगवद्गीतादिकं मूलेन संस्कृतेन पठनीयम् इति, प्राचीनभारतस्य ज्ञानभण्डारं प्राप्तव्यम् इति च इच्छया संस्कृतं पठन्ति । केचन आत्मज्ञानाय, मोक्षेच्छया वेदान्तग्रन्थान् मूलेन संस्कृतेन अध्येतुमिच्छन्ति । योग-आयुर्वेद-वास्तुशास्त्र-नाट्य-शास्त्रेत्यादिषु विविधभारतीयविद्यासु आसक्ताः अपि संस्कृतं पठन्ति । सङ्गणकीयस्य कृते संस्कृतम् उपयुक्तमिति प्रचारकारणात्, संस्कृतवाङ्मये वैज्ञानिकविषयाः, वैज्ञानिकग्रन्थाः वा सन्ति इति कारणाच्च अन्ये बहवः संस्कृतपठने प्रवर्तमानाः सन्ति । किञ्च अद्य भारते राष्ट्रियपरिवेषे हिन्दुजागरणात् आत्माभिमानस्य भारतीयत्वाभिमानस्य वर्धनकारणात् विदेशेषु भारतीयविद्याः प्रचारपथे सन्ति इति हेतोः च संस्कृतपठनं, भाषणेषु संस्कृतश्लोकानाम् उल्लेखनम्, गृहेषु प्रदर्शनकपाटिकासु संस्कृतग्रन्थानां स्थापनम् इत्यादिकं प्रतिष्ठायाः विषयः जायमानः अस्ति ।

संस्कृतानुरागिणः सन्तोऽपि केचन जनाः संस्कृताभ्यासे प्रवृत्ताः किमर्थं न भवन्ति इत्यत्र मानसिक-अवरोधाः, व्यवस्थायाः अभावः, 'संस्कृताभ्यासः अनिवार्यः' - इति भावनायाः अभावः इत्येतानि त्रीणि कारणानि भवितुमर्हन्ति ।

मानसिकः अवरोधः

मानसिक-अवरोधः (Mental Block) इत्यस्य अवगमनाय एका घटना ज्ञातव्या । कर्णाटके हरिहरपुरम् इत्यत्र प्रतिवर्षं ग्रीष्मावकाशकाले

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दुबालानां वेदशिक्षणशिबिरं प्रचलति । १० वर्षेभ्यः प्राक् तादृशे शिबरे रा. स्व. सङ्घस्य कर्णाटकप्रान्तस्य तदानीन्तनप्रचारकः श्री न. कृष्णप्पमहोदयः उपस्थितः आसीत् । तस्य भाषणं श्रोतुं ग्रामप्रमुखाः बहवः आगताः आसन् । कश्चन संस्कृतकार्यकर्ता कृष्णप्पमहोदयं द्रष्टुं गतवान् आसीत् । श्री कृष्णप्पमहोदयः वेदशिबिरबालानां, ग्रामजनानां च पुरतः संस्कृतकार्यकर्तारम् उक्तवान् यत् 'संस्कृतेन एकां कथां वदतु' इति । तेन कार्यकर्त्रा ४० निमेषान् यावत् बालैः अश्रुतपूर्वा जोरावरसिंहफतेह-सिंहयोः बलिदानस्य कथा श्राविता । अनन्तरं बालान् उद्दिश्य 'कथा अवगता किम्?' इति पृष्टे सति सर्वे बालाः न केवलम् 'आम्' इति उक्तवन्तः, अपि तु तामेव कथां यथा उक्तं तथा एव तैः एव वाक्यैः कन्नडभाषया पुनः उक्तवन्तः । कार्यक्रमानन्तरं सर्वे ग्रामजनाः कृष्णप्पमहोदयं पृष्टवन्तः यत् 'बालाः कथां सम्यक् ज्ञातवन्तः । वयं प्रौढाः नैव ज्ञातवन्तः । किमर्थम् एवम् ?' इति । तदा कृष्णप्पमहोदयः उक्तवान् - ''बालाः 'कथा ज्ञातव्या' इति कुतूहलेन सश्रद्धं शृण्वन्ति, अवगच्छन्ति । प्रौढाः तु आरम्भे एव 'अहं संस्कृतं न जानामि' इति मनसः द्वारस्य पिधानं कुर्वन्ति । अतः कथा अन्तः न प्रविशति एव'' इति । एषः एव मानसिक-अवरोधः नाम ।

मिथ्याभावनाः

संस्कृतं कठिनम्, व्याकरणभूयिष्ठम् (अभ्यसितुं न शक्यते), निर्जीवम्, एषा ब्राह्मणानां भाषा, संस्कृतपठनं नाम 'रामः रामौ रामाः ...', 'गच्छति गच्छतः गच्छन्ति ...' इत्यादीनां - शब्दरूपाणां धातुरूपाणां च कण्ठस्थीकरणम्, संस्कृतं नाम पूजादिकर्मकाण्डम्, संस्कृतं नाम पुरातनं, (कालबाह्यं out-of-date इतिवत्) - इत्येवंप्रकारेण जनानां मनसि याः मिथ्याभावनाः, ये च पूर्वाग्रहाः वा सन्ति ते जनानां भाषाभ्यासस्य प्रवर्तने अवरोधाः भवन्ति । तेषां निवारणोपायाः चिन्तनीयाः, तदनुकूलाः कार्यक्रमाः आयोजनीयाः च ।

संस्कृतं कठिनम् इति भावना कथम् आगता स्यात् ? तत्र त्रीणि कारणानि स्युः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. संस्कृतं ते यदा श्रुतवन्तः - मन्दिरे, कर्मकाण्डे, पण्डितानां शास्त्रसंवादसन्दर्भे, भगवद्गीता-स्तोत्र-सुभाषितादि-पद्यकाव्य-श्रवणसन्दर्भे च - तदा श्रुतस्य अर्थं न ज्ञातवन्तः । दैनन्दिनजीवनस्य व्यवहारः संस्कृतेन क्रियते चेत् प्रसङ्गवशात् अभिनयादिना च अर्थबोधः भवति । परन्तु काव्यभाषा-श्रवणसमये न तथा भवति । अतः कठिनमिति भासेत ।

२. कस्यचित् विषयस्य पाठयितारौ सुशीलः, किशोरः इति शिक्षकौ स्तः इति चिन्तयामः । तयोः सुशीलस्य पाठनं श्रुत्वा छात्राः काठिन्यम् नीरसतां च अनुभवन्ति, परन्तु किशोरस्य पाठनं श्रुत्वा सारल्यम् अनुभवन्ति, रसास्वादं च कुर्वन्ति । एवं तर्हि पाठनपद्धतिः अपि विषयस्य सरलतायाः अनुभवे कारणं भवति इति निर्णेतुं शक्यते । अद्य संस्कृतशिक्षणे व्याकरणानुवादपद्धतिः इति युरोपीयपद्धतिः अस्ति । सा पद्धतिः अपि 'संस्कृतं कठिनम्' इति भावनायाः अपरं कारणम् ।

३. पद्धतिः यथा तथैव अवैज्ञानिकरीत्या लिखितानि पाठ्यपुस्तकानि अपि समानकारणं भवति । यथा बिहारप्रान्तस्य षष्ठकक्ष्यायाः संस्कृतपाठ्यपुस्तके प्रतिपाठं अन्ते 'व्याकरणांशः' इत्यत्र नामधातुप्रकरणम्, सन्नन्तप्रकरणम्, उपपदसमासः (समासः नाम किम्, विग्रहः नाम कः इत्येव विवरणं नास्ति, तत्पुरुषसामान्यस्य परिचयः नास्ति, साक्षात् उपपदसमासः !), घञ्, ष्यञ्, ल्युट्, ल्यप् इत्यादयः बहवः प्रत्ययाः - इत्यादयः विषयाः तत्र दत्ताः सन्ति । छात्राणां का गतिः भवेत् ?

किं किं करणीयम् ?

जनाः संस्कृतं पठितुम् इच्छन्ति चेदपि योग्यव्यवस्थायाः अभावात् बहुशः तत् कर्तुं न शक्नुवन्ति । 'किं पुस्तकं पठनीयम्, कुत्र कक्ष्या भवति, कः पाठयति' इत्यादि प्रश्नानाम् उत्तराणि न प्राप्नुवन्ति जनाः । अतः अस्माभिः अत्यन्तं वैज्ञानिकरूपेण रचितानां बहुविधानां छात्रोपयोगिनां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुस्तकानाम्, ध्वनिमुद्रिकाणाम्, वीडियो - इत्यादीनां च महता प्रमाणेन प्रकाशनं करणीयम् । वर्तमानसंस्कृतशिक्षकाणां सम्भाषणशिक्षणस्य प्रशिक्षणं कृत्वा, तथा च प्रविष्टसम्भाषणशिबिराणां विशेषतया भाषा-शिक्षणं शिक्षकप्रशिक्षणं च दत्त्वा महत्या संख्यया सम्भाषणशिक्षकाणां निर्माणं करणीयम् । तेषां शिक्षकाणां द्वारा स्थाने स्थाने निरन्तरं संस्कृतसम्भाषणशिबिराणां, साप्ताहिकमेलनानां, भाषाबोधनवर्गाणां च आयोजनं कर्तव्यम् । पत्राचारमाध्यमेन संस्कृतशिक्षायाः व्यवस्था प्रति-राज्यम् आरब्धव्या (सद्यः एव संस्कृतभारत्या आरप्स्यते) । विविधसंस्थानां माध्यमेन आयोज्यमानानां सरलसंस्कृतपरीक्षाणां छात्रसंख्या वर्धनीया । सम्भाषणसन्देशस्य इतरसंस्कृतपत्रिकाणां च ग्राहकसंख्या वर्धनीया - एवं पञ्चविधव्यवस्थाकरणं केवलं न पर्याप्तम् । एताः व्यवस्थाः सन्ति इति जनैः ज्ञातं भवेत् । अतः व्यवस्थाविषये प्रचारः अपि तावान् एव प्रधानः ।

अद्य समस्ते भारते संस्कृतच्छात्रसमूहः संस्कृतशिक्षकगणश्च घोरनिराशायाम् अस्ति । तत्र उत्साहनिर्माणं करणीयम् । संस्कृतपाठशालाः पुनः चैतन्यशालिन्यः भवेयुः । संस्कृतेन समकालिकसाहित्यनिर्माणं भवेत् । अद्यतनजगतः सर्वान् विषयान् संस्कृतेन अभिव्यञ्जयितुम् अपारप्रमाणेन नूतनशब्दनिर्माणं कर्तव्यम् । विज्ञानस्य विविधशाखानां संस्कृतेन अनुवादं कृत्वा नवं विज्ञानसाहित्यं रचनीयम् । जीवनस्य विविधक्षेत्रं प्रति संस्कृतं नेतव्यम् । प्राचीनताडग्रन्थानां सङ्ग्रहः, प्रकाशनं च कर्तव्यम् । प्राचीनकाले शास्त्रज्ञानवर्धनं 'Scissoring & Pasting' इति कथ्यमानेन गवेषणेन नाभवत्, अपि तु गुरुमुखात् अध्ययनेन, वाक्यार्थ-सभादि-विद्वद्गोष्ठीभिः च अभवत् । अतः गुरुमुखात् शास्त्रपाठनं शास्त्रार्थसभाः च व्यवस्थापनीयाः ।

संस्कृतज्ञानां कृते विज्ञानादि-आधुनिक-विषयाणां परिचयः कारणीयः, वैज्ञानिकानां च कृते संस्कृतशिक्षणं कारणीयम् । एतत् शिक्षाविभागद्वारा न भवेत् । तत्र तत्र केचन उत्साहिनः स्वप्रेरणया स्वप्रयत्नेन च एतादृश-संयोगः यथा भवेत् तथा कारयेयुः । छात्राः एकां विद्यां नियतच्छात्ररूपेण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपरां च बाह्यच्छात्ररूपेण प्राप्नुयुः । क्षीयमाणशास्त्राणाम् अध्ययनाय एकैकः युवा प्रेरणीयः योजनीयश्च । शास्त्रसंरक्षणाय, संशोधनाय, संवर्धनाय च विविधाः उपक्रमाः आपत्कालत्वरितगत्या, युद्धसज्जतारीत्या च करणीयाः ।

वर्तमानसंस्कृतशिक्षकाणाम् अभ्यासवर्गाः, नैपुण्यवर्गाः, प्रशिक्षण-वर्गाः वा प्रतिजनपदं भवेयुः । संस्कृतशिक्षाक्षेत्रे परिवर्तनं भवेत्, पाठ्यपुस्तकानां परिष्कारः भवेत् । भारते आंग्लेयानां काले संस्कृतशिक्षायाः उद्देशः संस्कृतसाहित्यस्य अवगमनम् अनुवादश्च आसीत् । अद्यावधि सः एव उद्देशः अनुवर्तते । (अतः एव व्याकरणानुवादपद्धतिः अपि अनुवर्तते ।) भाविभारतनिर्माणाय संस्कृतस्य भाषितभाषारूपेण उपयोगः, भाषाशब्दस्य सार्थकत्वस्य सम्पादनम् इत्येतदपि संस्कृतशिक्षायाः उद्देशः भवेत् । वस्तुतः सः आद्यः उद्देशः भवेत् । तथा चेत् वर्तमानसंस्कृतशिक्षाक्रमस्य आमूलाग्रपरिवर्तनं भवेत् । एतत् कार्यं सांसदाः मन्त्रिणः वा नैव कुर्युः, वयं संस्कृतज्ञाः एव कुर्याम ।

भारतस्य अद्यतनीयाः समस्याः अस्माभिः ज्ञायन्ते एव । तासु जातिवादः, प्रत्येकतावादः, प्रादेशिकवादः इत्यादयः हिन्दुसमाजस्य छिद्रीकरणे प्रयत्नशीलाः सन्ति । हिन्दुसमाजः एव नष्टः चेत् संस्कृतं कथम् अवशिष्येत ? अतः अद्य सामाजिकसमरसता राष्ट्रिया आवश्यकता । यदि संस्कृतं वर्तमानसमस्यायाः उत्तरं ददाति, संस्कृतमाध्यमेन समस्यापरिहारः भवति तर्हि संस्कृतमपि समाजेन सार्वत्रिकरूपेण स्वीकृतं भवति । अतः जातिभेदादि-विविधभेदभावानां निवारणाय सर्वेषां संस्कृतपाठनं कर्तव्यम् ।

प्रथमं कार्यस्य उद्देशस्य स्पष्टता आवश्यकी, निर्दिष्टता आवश्यकी । गोष्ठीषु यदा 'अस्माकम् कार्यस्य लक्ष्यं किम् ?' इति पृष्टं चेत् 'संस्कृतप्रचारः' इति बहवः वदन्ति । 'संस्कृतप्रचारः' इति तु अस्पष्टकथनं (Vague statement) भवति । अपि च संस्कृतप्रचारः अस्माकं कार्यस्य अन्तिमलक्ष्यं भवितुं नार्हति । भाषा साधनम् । साध्यं तु राष्ट्रस्य परमं वैभवम् । अस्माकं साध्यसाधनविवेकः आवश्यकः ।

उद्देशानुगुणमेव कार्यक्रमाणां रचना भवेत् । १९८१तमे वर्षे संस्कृत-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्भाषणान्दोलनस्य आरम्भः अभवत् । भारते बहुभ्यः दशकेभ्यः 'संस्कृतेन व्यवहारः भवेत्' इति जनाः भाषणानि कुर्वन्ति स्म । परन्तु तदनुरूपकार्यक्रमान् न आयोजितवन्तः । १९८१तमे वर्षे यदा संस्कृत-सम्भाषणशिबिराणाम् आरम्भः अभवत् तदा विचारः व्यवहाररूपं प्राप्नोत् । जीवः शरीरधारणम् अकरोत् । प्रशिक्षणमहाविद्यालयेषु भाषा-शिक्षणपद्धतीनां पाठनम् अभवत् । सम्भाषणान्दोलनेन पद्धतीनां क्रियान्वयनं कृत्वा पाठमालाः उपनिबद्धाः ।

संस्कृतार्थं किं किं कर्तव्यम् इति कथयितारः वयमेव केवलं न । बहूनां जनानाम् अत्युत्तमाः कल्पनाः सन्ति तद्विषये । परं कल्पनाः श्वेतपत्रेषु, सभासु, भाषणेषु वा केवलं न तिष्ठेयुः । कार्यक्रमः रूपणीयः । कार्यस्य आरम्भः कर्तव्यः । सातत्येन दीर्घकालं यावत् करणीयम्, अविरतं कर्तव्यम् । सर्वैः सह मिलित्वा कर्तव्यम् । संघटितप्रयत्नः कर्तव्यः ।

संस्कृताभिमानिसंस्थाः, संघटनानि च बहूनि सन्ति स्थानीयस्तरे, जनपदस्तरे, विभागस्तरे, प्रान्तीयस्तरे, देशस्तरे च । पुनश्च तेषु सांस्कृतिकसंस्थाः, सामाजिकसंघटनानि, धार्मिकसंस्थाः, मठमन्दिराणि, शैक्षणिकसंस्थाः, औद्योगिक-व्यावसायिक-वृत्तिक-संघटनानि, सेवा-संस्थाः इत्येवंप्रकारकाः सन्ति कतिचन सहस्रम् । तादृशसंस्कृताभिमानि-संस्थानां संघटनानाम् अभिनिर्धारणं (identification) कृत्वा तेषां सूची करणीया । संस्कृतसम्बन्धे देशव्यापिसर्वेक्षणं कृत्वा सर्वविधविषयाणां सङ्ग्रहः (Information Data Base) कर्तव्यः ।

कथं जनान्दोलनं भवेत् ?

संस्कृतकार्येण जनान्दोलनेन भवितव्यं चेत् विद्यमानाः सर्वाः संस्कृतप्रचारपरिषदः संस्कृतसम्बन्धिसंस्थाः च परस्परं पूरकाः सत्यः, सहयोगेन, एकसूत्रेण च कार्यं कुर्युः । तदर्थं संस्कृतज्ञानाम् अस्माकम् उदारता आवश्यकी । व्यक्तिगताः संस्थागताश्च अभिनिवेशाः विलयं गच्छेयुः । सर्वैः एकत्र उपविश्य कार्ययोजना कर्तव्या । पञ्चवर्षाणां दश-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्षाणां वा निश्चिता विस्तृता गभीरा च कार्ययोजना कर्तव्या । सा च योजना अस्मत्शक्तिकेन्द्रिता भवेत् ।

कार्यसाधनार्थं कार्यकर्तारः अपेक्षिताः एव । 'सर्वे जनाः अधिकाधिकं समयं दद्युः; अधिकाः जनाः सर्वं समयं दद्युः' इति ज्येष्ठानां मार्गदर्शनानुसारं संस्कृतं स्थानं स्थानं नेतुं प्रतिगृहं प्रतिजनहृदयं च प्रापयितुम् अधिकाधिकाः युवानः पूर्णं समयं समर्पयेयुः । प्रत्येकं संस्कृतच्छात्रः स्वस्य विद्याभ्यासस्य अनन्तरम्, उद्योगप्रवेशात् पूर्वम् न्यूनातिन्यूनम् एकं वर्षं संस्कृताय समर्पयेत् । वेतनेन विना, अन्यव्यक्तिगत-आकाङ्क्षाः विना पूर्णसमर्पणभावेन भारते यत्र कुत्रापि गत्वा सूचितं यत्किमपि संस्कृतकार्यं कर्तुम् अग्रे आगच्छेत् । यदि प्रत्येकं संस्कृतच्छात्रः एतादृशं स्वल्पं चेदपि महत्त्वभूतं त्यागं करोति तर्हि द्वित्रेषु वर्षेषु एव वयं महतीं सिद्धिं प्राप्तुं शक्नुयाम ।

संस्कृतसम्भाषणमाध्यमेन राष्ट्रोन्नयनस्य मार्गः एषः कण्टकाकीर्णः एव । परन्तु साहसमनोभाववतां कार्यकर्तॄणां कृते तु एषः आनन्दपर्वतः । अद्य संस्कृतमाता बहूनाम् अग्रेसराणां प्रतीक्षायाम् अस्ति । व्यक्तिविकासः राष्ट्रवैभवम् इत्येतद्द्वयमपि साधयितुं योग्ये एतस्मिन् महामार्गे किं भवानपि महासाधनां चिकीर्षति ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतदेव तद् माध्यमम् -

-संस्कृतभाषायाः सुष्ठु अभ्यासाय; कश्मीरतः कन्याकुमारीपर्यन्तं, विधालयतः विश्वविद्यालयपर्यन्तं संस्कृतस्य च्छात्राणां, शिक्षकाणां, प्राध्यापकानां च देशव्यापि-संघटननिर्माणाय; संस्कृतसम्बन्धि-कार्यक्रमाः, सर्वकारीययोजनाः इत्यादिरूपेण संस्कृतजगतः सर्वाः वार्ताः ज्ञातुम् च।



समसामयिकलेखाः, कथाः, व्यावहारिकं व्याकरणम्, आधुनिकी व्यावहारिकी च शब्दावली, प्राचीन-भारतीय-विज्ञानं, विनोदकणिकाः, व्यङ्ग्यचित्राणि इत्यादिरूपेण अनेके आकार्षकाः स्तम्भाः । बहुवर्णमुद्रणम् । इदानीमेव देशे सर्वत्र १५,००० अधिकाः ग्राहकाः ।

भवान् अपि सम्भाषणसन्देशस्य ग्राहकः भवतु । वार्षिकं ग्राहकशुल्कं रु.८०/- बैंक ड्राफ्ट अथवा धनादेशद्वारा (चैक स्वीकृतं न भवति) अधोनिर्दिष्टं पत्रसङ्केतं प्रति प्रेषयतु -

सम्भाषणसन्देशः

Aksharam, Girinagar, Bangalore - 560 085

CC-0. Nepal Sanskrit Academy, Kathmandu Collection